हरिसं०
॥१॥

॥श्रीसहजानंदस्वामिनेनमोनमः॥विघ्नहर्त्रेहेरंबायनमः॥ ॥श्रीमद्ब्रह्मपदाधिपंश्रुतिगणैर्मूर्त्तैश्चमुक्तव्र सर्ग-१
जैर्दिव्यैः संस्कृतमानतंनिजजनाह्लादप्रदंभास्वरम्॥ दिव्यानेकविभूषणांबरवयैर्वैश्चैतोहरंतंसतांध्यायेहृ
द्विविहृद्धिदंहरिमहंभक्त्यात्मजंसद्गुरुम्॥१॥ गदितललितकाकलीकवाक्योजनपथुकोवकुरवलनप्र
वीणः॥ वदितकलवचोभिरात्मबंधून्विपरिरंजयतेमतस्तथाहम्॥२॥ विद्वज्जनान्केचिदनेकयुक्तियुक्तैः
कसंदर्भविधानयोगैः॥ कुर्वंतितत्तन्मतिःप्रसन्नान्कर्त्तुंसमीहेकलभाषणेऽस्तत्॥३॥ टीकाविधानेनचमे
ऽस्तिबुद्धिर्ग्रंथानबुद्धाबहवोनकोनृणाः॥ नानामिरीतिनचतत्कृतेश्चसमुक्तकोऽस्मत्रतथापिमोहनात्॥ध
टीकाकविर्नास्मिकथंकरोमीसंवंविचार्यापिनमोनमर्हं॥ धुन्वक्षिपक्षीमनुजाकोऽपिपक्षीविज्ञायतेनस्थित
एवमेव॥५॥ धनव्ययाद्यैर्वकृभिर्हियोगैःप्रसन्नतार्थंविदुषांयतंते॥ बुधास्तदालोकयहृतिमदीयांविनैव
यत्नेनतथाविधाःस्युः॥६॥ स्फुर्यैसूक्तिविभावनप्रणयिनोदक्षागुणालंक्रियायुक्तोकौतुकिनोहरेर्गुणच
रित्रोपश्रुतोभावुकाः॥ प्रसक्षेम्बूरकीर्तिसत्प्रणयिनांपुंसांकृतेहंस्तुभांमाख्यांश्रीहरिसिंभवस्परचयेविद्व
ज्जनाह्लादिनीम्॥७॥ नेताऽस्मिन्नृपनंदनःसभगवान्भक्तिप्रधानेरसःसच्छांतादिभिरंगवान्विजयतेनो
पोनरुक्त्यंकवित्॥ साक्षादीश्वरकीर्तनंहिविषयस्त्वैकांतिकत्वंफलंधर्मोऽचिंसमुनिर्वयंस्कृहृतिनस्त ॥१॥

ह्लाकृप्रसंसेवनात्॥८॥ अचिंसानंदवर्णीड्वाक्यारंभवत्रणारदा॥ भगवान्हरिःकृष्णरूपमथविद्वुर्नामेतुमाहतना:
९॥ कृविसानंदसंबद्धंकाव्यंकाव्यामतिर्मम॥ उपहास्योभविष्यामिविदुषांतदुदाहरन्॥१०॥ बुद्धीद्वि
यप्राणमनांसिदेवोददातियःकारणभाजितीवान्॥ वचांसिसोऽलंकुरुताद्धरिर्मितनोतुनिर्विघ्नसमाप्तिम
स्य॥११॥ भोलानाथककविःसोहंसज्जनकरंजनायवै॥ मावक्षेतन्महाकाव्यमचिंसानंदसत्कृतिम्॥१२॥ मया
व्याख्यायतेसर्वमिहान्वयमुखेनवै॥ निर्मूलंलिख्यतेनात्रोच्यतेनाप्यनपेक्षितं॥१३॥ किमपिलिखलामसु
न्मसापत्तेदिहदूषणंनिपुणमतिनिस्तन्कासेव्यारुतिर्ममतबुधैः॥ विमलसरसिक्षिप्तंवातैर्निवार्यतृणा
दिकंजलमथयस्कधापापप्यायःपिबंतिपिपासवः॥१४॥ अनुगृहीतंतुगृहीतंतुविद्वांसोगतमत्सराः॥ काकुंवा
कंवचश्चित्रंभोलानाथेनभाषितम्॥१५॥ अथानेककविराजराजिमौलिमालिविराजमानरत्नातानंदमुन्नंतः
पेरितोऽत्रभवान्महाकविराजःश्रीमदचिंसानंदमुनिःकाव्यंयत्रासेऽर्थंकृतेअवहारविदेत्रिवेतरक्षतये॥ स
द्यःपरनिर्वृत्तयेकांतासंमिततयोपदेशयुजेदसालंकारिकवचनप्रामाण्यात्काव्यस्यानेकाश्रयफलहेतु
तोकाव्यालापांश्चवर्जयेदित्यादिवचनानांरावणादिप्रणीतासाधुकाव्यविशेषनिषेधपरतांवालोचयन्न
पूर्वंहरिसिंभवाख्यंमहाकाव्यंविधिक्रांर्वधिक्तितार्थंनिर्विघ्नसमाप्तिसंप्रदायपरिपालनेनसाधनत्वा

॥२॥

दाशीर्नमस्क्रियावस्तुनिर्देशो वापि तन्मुखमिति काव्यप्रकाशोक्ताकारवचनादाशीराद्यन्यतमस्य काव्यमुखल
क्षणत्वात्तत्रानुवर्णनीयपरमात्मस्वरूपमनःसंदधानः शिष्टाचारप्राप्तंनमस्कारात्मकंमंगलं शिष्यशिक्षायै
निबध्नाति श्रीमदिति ॥ श्रीमद्ब्रह्मपुराधिपः श्रीमूर्त्तिमंतीलक्ष्मीः कृपासिंधुर्विद्यतेयस्येति ॥ यद्वा श्रीः शोभ
नोवेषः ॥ यद्वा श्रीर्भक्तजनमनोहरावाक् ॥ यद्वा श्रीर्नानाविधभक्तजनैर्नानालंकारयुक्तस्वभावकंदरमूर्त्ते
रालोकनार्थमर्पितवेषोपकरणम् ॥ यद्वा श्रीः स्वतः सिद्धशोभापाटवं चेति श्रीभूतासा विद्यतेयस्येति श्री
मान् ॥ श्रीर्वेषरचनाशोभाभारती सरलद्रुमेषु ॥ लक्ष्म्यां त्रिवर्गसंपत्तौ वेषोपकरणे मतावितिविश्वः तदस्यास्
मिन्निति मतिब्विति मतुप् ॥ ब्रह्मणो नारायणस्य पुरं ब्रह्मपुरं ॥ अथयदिदमस्मिन्ब्रह्मपुरे ब्रह्मपुरे सर्वे सम
हितं ॥ अपराजिता पूर्ब्रह्मण इति छांदोग्योपनिषदुक्तमक्षरधामाख्यपुरं तस्याधिपतिः स्वामी अधिरा
जइतियावत् ॥ स चासौ स चेति ॥ स्वभावस्कंदरोऽपि स्वभक्तलक्ष्म्यादिनिष्पादितवेषतद्रुपकरणस्वाकृ
शोभापाटवादिमान् ब्रह्मपुराद्वितीयपालकइत्यर्थः ॥ अत्राद्यपक्षे लक्ष्मीरूपलक्षणमुक्तं तज्ज्ञानाम् ॥ ह
रेरनुव्रता यत्र करणकरार्चिताइतिभागवतोक्तेः ॥ यद्वा श्रीः कमलानित्यसहचारिणी विद्यतेयस्य ॥ तासां श्रीः
कमलेंदिरेस्यमिधानचिंतामणिः ॥ तथाभूतं ब्रह्मपरमात्मा ॥ ब्रह्मेति परमात्मेति भगवानिति शब्द्यत ॥ इति ॥३॥

श्रीशुकोक्तेः ॥ श्रीमद्ब्रह्मपुराणिचेतनास्मानिस्वशरीराणि ॥ पुरंपुरिशरीरे चेति विश्वः ॥ तेषामधिपो निय
ता ॥ तच्चासौ सचेति कर्मधारयः ॥ भिन्नलिंगयोरपि सामानाधिकरण्येन कर्मधारयविधानमुपाध्यायनंदंति
नामदत्तस्तत्रभाष्यमुक्तोमल्लिनाथादिभिर्विधानात् ॥ सदालक्ष्मीसहचरोऽपि चेतनाचेतनवृंदनियमनकर्त्ते
त्यर्थः ॥ यस्य पृथिवी शरीरं ॥ यस्यात्मा शरीरमिति बृहदारण्योपनिषदि चेतनाचेतनानां तच्छरीरत्वप्रति
पादनात् ॥ श्रुतिहरः हरतीति हयग्रीवाख्यं हत्वा आच्छिनत्तीति हरः ॥ पचाद्यच् ॥ श्रुतीनां वेदानां हरस्त्राहर्त्ता
श्रुतिः स्त्री वेद आम्नायस्त्रय्समरः ॥ दैनंदिनप्रलये संक्षिप्तविधेर्मुखाच्चलितान्वेदान् हयग्रीवोऽपहृत्यपला
यितवान् तं च वेदापहर्त्तारमसुरं प्रलयापाये हत्वा वेदानानीय ब्रह्मणे प्रददावामहामत्स्य इत्यर्थः ॥ हयग्री
वो निकटे हरत् ॥ प्रलयपयसि धातुः कृतत्रोक्तेर्मुखेभ्यः श्रुतिगणमपनीतं प्रत्युपादत्त हत्वेति च भागवतो
क्तेः ॥ अत्रेदंतत्त्वम् ॥ मत्स्यावतारस्य द्विः संभवादत्र स्वायंभुवमन्वंतरादौ प्रादुर्भूतस्यासुरं हत्वा विधये वेद
प्रदातुरेव तस्य ग्रहणं कर्त्तव्यम् ॥ न तु चाक्षुषमन्वंतरांतर्गतसत्यव्रतकृपाकर्त्तुर्मत्स्यावतारस्य ॥ वेदानां पू
र्वमत्स्यावतारेणैवानीतत्वादपरेणतु सत्यव्रतायदयामात्रस्य प्रदर्शितत्वाच्च तथा चोक्तं लघुभागवतामृते
मत्स्योऽपि प्रादुरभवद्द्विः कल्पेऽस्मिन्वराहवत् ॥ आदौ स्वायंभुवीयस्य देहं घ्नन्नाहरच्छ्रुतीः ॥ अंतेतु चा

क्षुधीयस्य रूपांसस्तव्रतेऽकरोदिति॥ भागवताष्टमस्कंधे तु ह्यवप्यवताराद्वेकीकृत्वैवोक्तम्॥ गिरेर्मंदराद्रेः
धर्त्ता कूर्मरूपेण पृष्ठे मंदराचलस्य धारक इत्यर्थः॥ एवं च त्वचावितिकर्त्तरि तृच् प्रत्ययः॥ पृष्ठे भ्राम्यदमंदमंद
रगिरिग्रावाग्रकंडूयनादिति भागवतेऽप्येवमंदरधरत्वोक्तेः॥ भूरुद्धः उद्धृता सुरुद्धो भुव उद्धर्त्तुन्नेता॥ पचा
द्यच्॥ त्रोषेयषष्ठात्तसुरूपः॥ अनेन वराहावतार उक्तः॥ अत्रेदमाकूतम्॥ हिरण्याक्षहननाद्युक्तिपूर्वकं
केवलं भूम्युद्धरणमात्रेण वराहावतारोक्तः एवं वराहावतारस्यापि द्विलसूचनाय कस्यैव लीलाकथिनैकोक्तेति
वराहद्वयोः सतिरप्युक्ता भागवतामृते॥ हिरा विरासीत्कल्पेऽस्मिन्नाद्ये स्वायंभुवांतरे॥ घ्राणाद्धि धेर्धरो धृत्से
चाक्षुषीयेतु नीरतः॥ मध्ये मन्वंतरस्यैव मुनेः शापान्मनुं पति॥ प्रलयोऽसौ बभूवेति पुराणे क्वचिदीर्यते॥ अ
यमाकस्मिको जातश्चाक्षुषस्यांतरे मनोः॥ प्रलयः पद्मनाभस्य लीलेयमिति कुत्रचित्॥ सर्वमन्वंतरस्यांते प्र
लयो निश्चितं भवेदिति दितिजोरसः दितिजो हिरण्यकशिपुस्तस्योरो वक्षस्तस्य॥ संभेत्ता विदारकः॥ अनेन
नृसिंहावतार उक्तः॥ कर्त्तरि तृच् प्रत्ययः॥ ददार करजैर्वक्षस्येरकां कटकृद्यथेति भागवते नृसिंहं भगवंतमु
द्दिश्यैव हिरण्यकशिपूरोविदारणस्योक्तत्वात्॥ वैरोचनेः विरोचनापत्यं बलिः॥ अत इञ् इति प्रत्ययः तस्य छ
लयिता प्रतारकः॥ कर्त्तरि तृच्॥ त्रिविक्रमछलेन तदैश्वर्ययुक्तां भुवमपहृत्येंद्राय तस्मै दात इत्यर्थः॥ अनेन वाम ॥२॥

नावतार उक्तः॥ भूत्वाथ वामन इमामहरद्बलेः क्ष्मां याच्ञाछलेन समदाददितेः सुतेभ्य इति भागवतोक्तेः॥ क्ष
त्रहा क्षत्रं हंति इमं सुप्तस्य गामिच यत् क्षत्रियं हंतत्व तिनाम्यायतीति तथोक्तः॥ अनेन परशुरामावतार उक्तः॥
क्विप्रेति हंतेः क्विप् प्रत्ययः॥ ननु हंतेः क्विब्विधौ ब्रह्माद्युपपदनियमः पितत्र भूत एवेति कालनियमाश्रयण
द्वर्त्तमानकाले भविष्यत्काले चोपपदांतरेऽपि भवत्येव क्विप्॥ हरिद्धयोऽरिद्धयोगविचक्षण इति रघुवंशादौ प्र
योगदर्शनात्॥ क्षत्रक्षयं कुर्वते॥ इमं क्षत्रवनच्छिदे इति च जयदेवात् क्रूराभ्यां क्षत्रहननस्य तदसाधारणत्वोक्तेः
पौलस्त्यं पुलस्त्यगोत्रापत्यं पौलस्त्यो रावणस्तं॥ गर्गादिभ्यो यञ् इति गोत्रे यञ् प्रत्ययः दलयन् विनाशयन्॥ अने
न रघुकुलतिलकः श्रीराम उक्तः॥ स्वार्थे णिजंताद्दलयतेर्लटः शत्रोः देशः पौलस्त्यनाशकत्वं श्रीरामस्यार्षे रा
मायणे इति प्रसिद्धं भुवः पृथिव्याः भरहर भरो भारस्तस्य हरो हर्त्ता भरोऽतिन्याय्यभारयोरिति विश्वः॥ अनेन
यदुकुलकुमुदविकाशाः श्रीश्रीकृष्णचंद्रावतार उक्तः॥ भुवो भगवानहरज्वरम्॥ भारावतरणायान्ये यदुकं
चले भूरिभरावतारकृतावतारस्य भूमेः सुरेतरवरूथविमर्दितायाः क्लेशव्ययाय चिकीर्षुर्भगवानस्याः त्रा
मजेनाभियाचितः कृत्वा निमित्तमितरेतरतः समेतान्हत्वा नृपान्पहरस्क्षितिभारमीशः इति च तत्र तत्र भूभा
रायनयनकृत्यस्य श्रीकृष्णमुद्दिश्यैव भागवते मुकुंदस्केरयं वस्केदेवापस्यं श्रीकृष्ण एव॥ दयां कारुण्यं

हरिसं· सर्ग·१
॥४॥

कुर्वन् ॥ विलुंठन् ॥ एतेन बुद्धावतार उक्तः ॥ कारुण्यमातन्वत इति जयदेवोक्तेः ॥ म्लोचयन् यत्नं तन्वन्निति रस
तरंगिण्यां भानुपंडितोक्तेश्च ॥ म्लेच्छहा म्लेच्छान् यवनप्रायान् दुष्टभूभुजो हनिष्यतीति नाम्ना यिष्यतीति तथोक्तः
अनेन कल्क्यवतार उक्तः ॥ क्षत्रं हे समरोत्करी साक्षिप तदप्युक्तं जयदेवेन म्लेच्छान् मूर्छयते इति ॥ म्लेच्छरक्तैर्दि
गंतान् सिंचन्निति भानुपंडितोक्तेश्च ॥ म्लेच्छप्रायक्षत्रहंत्रे नमस्ते कल्किरूपिण इति भागवते ॥ क्रूरश्चैतेन त्रयोऽपि
म्लेच्छगणानां विनाशकं कल्क्यवतारं च भणति ॥ इत्थं यो दशाकृतिधरः दशानामाकृतीनां वपुषां धरो धारकः ॥ गं
गाधरादिवत्कर्मणः संबंधसामान्यविवक्षया ऽणो भावेन षष्ठी च विशेषणसमासः ॥ आकृतिः कथि
तारूपे सामान्यवपुषोरपीति विश्वः ॥ श्रीधर्मसूनुः ॥ श्रयति धर्ममिति श्रीः कुर्यात् सः ताप्योसन्नाम् लक्ष्मीर्वेषेम
वसपरनामप्रसिद्धास्तयं भक्तिश्च ॥ धर्मः आत्रेयगोत्रोत्पन्नो देवशर्मापरनामा हृषस्तयोः सूनुः पुत्रः ॥ अ
त्र धर्मपदसान्निध्यात् श्रीशब्दस्य धर्मपत्नीं भक्तौ शक्तिर्नियम्यते ॥ तदेतदुक्तं काव्यविदानंदे ॥ संकेतग्रहणे
हेतुर्गुणदाहरणैः सह ॥ प्रायो व्याकरणं कोशो निरुक्तं मुनिवागपि ॥ व्याख्यानं वाक्यशेषश्च प्रसिद्धार्थ
स्य सन्निधिः ॥ उपमानं प्रमाणं च व्यवहारश्च तद्विदामिति ॥ यद्वा ॥ यद्वा श्रियाल्हादनवैराग्यादिरूपयायुक्तो यो
धर्मो वृषस्तस्य सूनुः कर्माणमूर्ति रेकांतिकधर्मपालकः कृपालुरनंतजीवसंसृतिमोचको ऽक्षरातीतः श्रु ॥४॥

तिशिरोऽधिगीतानेकैश्वर्ययशाः कलापः श्रीवासुदेवो भगवान् तं सर्वावतारधरं स्वामिनं ॥ नित्यसिद्धदिव्य
सर्वसंपदमेकमेवपतिम् ॥ इत्थं आदयो धनी स्वामी त्वीश्वरः पतिरीशितेसमरोक्तेः ॥ यद्वा स्वामिन्नैश्वर्ये इति
निपातनात्सर्वातिशयैश्वर्ययुक्तमित्यर्थः ॥ यद्वा एक एव हरिः स्वामी शाश्वतोऽस्ति सर्वथा ॥ अमस्कृत
दुपास्यासद्गुणयोगान्तथोच्यत इति वृद्धहारीतपुराणोक्तेः स्वामिशब्दवाच्यं निर्हेतुककरुणा विद्धत दिव्य
नराकारमसरमजन्मोपार्जितनिष्कामसुकृतैकलभ्यं नरनाटनानुरूपाने कैश्वर्यप्रदर्शकमपि चर्मचक्षुषा
मकारणांतथानवभासमानं हरिसिंहपुरुषोत्तममित्यर्थः ॥ अहममर्विसानंदनामा नत्गुणवर्णनैकतानस्तु
द्दासो नौमि प्रणाममकरोमि ॥ नमस्कारात्मकमंगलमेतत् ग्रंथेऽस्मिन् शब्दानामस्पष्टार्थत्वेन प्रसादो गुणः
तदुक्तं काव्यप्रकाशे ॥ श्रुतिमात्रेण शब्दानां येनार्थप्रत्ययो भवेत् ॥ साधारणः समग्राणां स प्रसादो गुणो
मत इति ॥ प्रायः प्रसादव्यंजकवर्णसंनिवेशात्कोमला वृत्तिः ॥ एतदपि तत्रैवोक्तम् ॥ माधुर्यव्यंजकैर्वर्णैरुप
नागरिकेष्यते ॥ ओजः प्रकाशकैस्तैस्तु परुषा कोमला परैः ॥ एते परे प्रसादव्यंजकैः ॥ दंडिमतेतु स्फुतिरेषेति
दिक् ॥ ननु नगरार्णवशैलर्तुचंद्राकोदयवर्णनैः ॥ उद्यानसलिलक्रीडामधुपानरतोत्सवैः ॥ मंत्रदूतप्रया
णाजिनायकाभ्युदयैरपि ॥ विप्रलंभैर्विवाहैश्च कुमारोदयवर्णनैः ॥ अष्टादशाभिर्लक्षणैर्महाकाव्यं तदुच्यते

आदुणीर्नमस्क्रियावस्तुनिर्देशो वापितन्मुखमिति॥ नगनदीसागरर्तुचंद्रार्कोदयोद्यानजलकेलिमधुपान
रतमंत्रदूतप्रयाणाजिनायकाभ्युदयविवाहविप्रलंभैरेभिरष्टादशभिर्लक्षणैर्लक्षितंमहाकाव्यमुच्यतेइ
तिच॥ काव्यकल्पलतायामप्यष्टादशातोप्यधिकलक्षणान्युक्तानितानियथा॥ राजामंत्रिपुरोहितौनृपव
धूसुतांगजः सैन्ययोदेशग्रामपुरीसरोऽब्धिसरिदुद्यानाद्र्यरण्याश्रमाः॥ मंत्रोदूतरणप्रयाणमृगयाश्वभ
र्त्तिजेदूदयाश्चोत्सवोविरहः स्वयंवरसुरापुष्पावचुखेलारतमितिकाव्यकल्पलतायांपंचमस्तवके॥ काव्यप्र
काशेचनीरसोपिनिबंधोयः सोऽपत्रापो महाकवेः॥ सतेनाकविरेवस्यात्॥ नारदागमप्रभृतिषुच॥ सरसा
लंकारवतीनिर्दोषागुणभूषिता॥ सरीतिर्लक्षणावतीयावाक्साकाव्यनामभाक्॥ अत्ररसग्रहणेनरसानु
गुणभावादयोऽपिगृहीताः॥ एतन्मतेरसलक्षणांतोसत्समावेशप्रकंपादिसादिनानीरसकाव्यग्रंथस्यनिबं
धलमेवनास्तीत्यभिधानाद्यास्मिन्ग्रंथेपूर्वोक्तानांबहूनांलक्षणानांसत्वेऽपिमधुपानशृंगारजलकेलिपु
ष्पावचयादेः सापेक्षत्वंकाव्यत्वलाभार्थमितिचेन्नदंडिनारसवर्णनप्रकृत्यंकाव्यमूर्तकांजनकत्वार्थसं
निवेशास्यचनिहितत्वात्॥ अतएवमाधवीयेशंकरदिग्विजयेमधुपानाद्यवर्णनेऽपिकेवलंशंकराचार्यचरि
त्रमात्रवर्णनेनापिग्रंथस्यतस्येतद्दीकाकारैः काव्यत्वंसमर्थितं भारविप्रणीतकिरातकाव्येचकुमारविवा



हाद्यवर्णनेऽपिमहाकाव्यत्वमस्ति॥ अतःपूर्वोक्ताष्टादशलक्षणयुक्तंमहाकाव्यमितिप्रायिकमेव॥ अन्य
थासोबबालरावणादिकृतानांग्रंथानांसौंदर्यलहर्यादीनामप्येषांचग्रंथानांशास्त्रीयप्रमाणगर्भाणाम
काव्यत्वापत्तिःस्यात्॥ किंचसर्गबंधोमहाकाव्यमितिदंडिवचनात्सर्गबंधत्वान्महाकाव्यत्वमस्य॥ किंचनी
रसोहिनिबंधोयइतिवाक्येरसशब्दस्यभावाद्युपलक्षणत्वेननीरसोनिर्भावादिशब्दप्रबंधोदूष्यतयाभिप्रेतः॥ अ
त्रतुभक्त्याख्यरसस्यदेवदेवपुरुषोत्तमनारायणविषयकभावस्यचसत्वेनादोषाभावः॥ ननुरसास्तुशृंगारादि

श्रीसहजानंदायनमोनमः॥ श्रीमद्धर्मपुराधिपः श्रुतिहरो धर्मोगिरेर्भूरुहः संभेत्तादितिजोरसस्थलयितावेदे
चनैः क्षत्रहा॥ पौलस्त्यंदलयन्भुवोभरहरः कुर्वन्दयांम्लेच्छहा यः श्रीधर्मसुतो दशाकृतिधरस्तंस्वामिनंनौम्यह
म्॥१॥

शांतातानवैवरसत्वाम्रुपसिद्धाः कुतोऽयंभक्त्याख्योदशमोरसउच्यतेतद्विभावादयश्चकेइतिचेच्छृ
णुदेवादिविषयारतिःभावइतिमम्मटलोल्लटभट्टदेवशुक्लादिभिरुक्तत्वात्श्रीहरिविषयप्रीतिरूपः स्थायीभा
वःसविभावादिभिः पुष्टोभक्त्याख्योरसः स्वयंश्रीहरिस्तदालंबनविभावः॥ तद्गुणश्रवणादयउद्दीपनविभावाः
रोमांचादयोऽनुभावाः औत्सुक्यादयः संचारिणः इतिरसविलासनामग्रंथस्त्रभाष्यरसिकानंदादावेतस्य

पंचीबोध्यः॥ रतिर्देवादिविषया व्यभिचारी तथांजितः॥ भावः प्रोक्तस्तदाभासास्त्वनौचित्यप्रवर्त्तिता इति काव्यप्र
काशे॥ एतेन भोजप्रबंधादिष्वपि काव्यत्वं समर्थितम्॥ तेषां राजविषयकभावमात्रप्रवृत्तत्वात्॥ काव्यप्रदीपे
चस्फुटालंकारसाधनतमत्वं काव्यत्वं॥ यतो रसादिरलंकारश्च हृद्यं चमत्कारहेतुरिति काव्यलक्षणकरणेन रसा
दिपदे स्फुटं भावोऽभिप्रेतः॥ काव्यप्रकाशे तु॥ तददोषौ शब्दार्थौ सगुणावनलंकृती पुनः क्वापि॥ शब्दार्थावुक्तः॥
काव्यविलासे श्रीचिरंजीविभट्टाचार्यैः॥ शब्दार्थौ तत्काव्यम्॥ अत्र चोद्देश्यविधेयभावेनान्वयान्न भिन्नलिंगता
दोषः॥ वेदाः प्रमाणमितिवत्॥ कीदृशौ तौ अदोषौ दोषरहितौ॥ दोषाः स्फुटदोषाश्च्युतसंस्कृतप्रभृतयः॥ सगु
णौ गुणसहितौ गुणा ओजःप्रभृतयः क्वापि पुनः क्वापि तु पुनः॥ अनलंकृती अपि स्फुटालंकाररहितावपि शब्
दार्थौ काव्यं भवत एवेति॥ रसादिकं विनापि शब्दार्थयोः सौंदर्य्यमस्तीति काव्यत्वमव्याहतमिति स्पष्टमुक्तं प्रपंचितं चैत
दान्नाधरभट्टैः स्वकृतग्रंथस्य काव्यत्वप्रतिपादनाय संध्यारत्नप्रदीपाख्यकिरणाख्यश्लोकव्याख्यानेन तत एत
स्माद्विस्तरेण बोध्यम्॥ एवं विनोदकाव्यव्याख्यायां ननु सर्गबंधो महाकाव्यमित्याद्यधिकृत्य कथमस्य सर्गबं
धरहितस्यापि एकश्लोकात्मकस्य काव्यलक्षणत्वमिति चेन्नैषा नूनं लक्षणं तदेवाधिकृत्य॥ नूनमप्यत्र येः केश्चि
दंगैः काव्यं न दुष्यतीत्युक्तेर्हित्वांगरहितत्वेऽपि न दोष इत्युक्तम्॥ अनेन नवीनानां विलक्षणचमत्कारकारित्व ॥६॥

मेव काव्यत्वमामनन्ति इत्युक्तं काव्यविलासे॥ उक्तं च घटखर्परस्य काव्यटीकाकारेण गणनाररहितस्य घटखर्पर
काव्यस्य महाकाव्यत्वमतोऽलमस्य महाकाव्यत्वप्रतिपादनविस्तरेणात्र॥ न चास्माकमतिव्याप्तिरेतस्य प्रतिपाद
नेनास्य कवेः कविपदवाच्यत्वापत्तिः किंतु कविः स्यात्काव्यकर्त्तेति कोशात्॥ इयताथ कवेरप्येतद्दोषेऽप्रसादो मा
यत्राप्स्य ग्रंथकर्तुरधिकविलक्षपदेनाग्न्याप्त्यैतद्दुर्घटम्॥ वस्तुतस्तु रुचिरः सर्वोऽपि प्रबंधः काव्यमिति काव्यप्र
काशसिद्धांतात्सर्वेऽपि ग्रंथकराः कवयः मल्लिनाथः कविः सोऽयमित्यादौ कविपदव्यपदेशस्य टीकाकारादावु
पिदर्शनादिति दिक्॥ एतावता रसज्ञास्त्रे साधूनां प्रवृत्त्यनुपपत्तेर्मधुपानस्य स्त्रीजातिकृतस्य श्रुतिस्मृतिषु निं
दितत्वाद्धूलतदाद्यवर्णनं चबुद्धिपूर्वकमेवान्येति तज्जिज्ञासुभिस्तदस्य काव्येऽभ्योबोध्यम्॥ अत्र वर्णनीयं धर्मात्म
जश्रीहरिचरित्रवर्णनं विषयः॥ तज्जिज्ञासुरधिकारी॥ बोध्यबोधकभावः संबंधः तस्मिन्ननीश्वरत्वसंज्ञायच्छे
दः प्रयोजनम्॥ एतदर्थमेव ग्रंथारंभप्रवृत्तेः॥ ग्रंथारंभोऽयमर्थमधिकृत्य प्रवर्त्तते तत्प्रयोजनमिति गोतमसूत्रो
क्तेः॥ अत्रादितो भूमिदेवताकस्य सर्वगुरोर्मगणस्य प्रयोगात्तत्काव्यपाठकानां शुभलाभ इति सूचितम्॥ त
दुक्तं छंदःशास्त्रे॥ शुभदो मो भूमिमयः इति मो भूमिस्त्रिगुरुः श्रियं दिशतीति च॥ मंगलादीनि मंगलमध्यानि मंगलां
तानि काव्यानीति श्रीशब्दस्य मंगलार्थत्वादादौ प्रयोगः॥ श्रीशब्दस्य च देवतावाचकत्वान्नदाचकशब्दस्य मंगल

हरिसं॰ ॥१॥ रूपत्वाच्छ्रुतगणादिदोषबाधः ॥ तथा चाह भामहः देवतावाचकाः शब्दा ये च भद्रादिवाचकाः ॥ ते सर्वे नैव निंद्याः सर्ग॰१
स्युर्लिपितो गणतोऽपि वे सम्यत्र विस्तरो द्रष्टव्यः ॥ शार्दूलविक्रीडितं वृत्तं ॥ सूर्याश्वैर्मसजस्ततः सगुरवः शार्दूल
विक्रीडितमिति तल्लक्षणात् ॥ १ ॥ मंगलभूयस्त्वे सिद्धिभूयस्त्वमिति पुनर्मंगलमाचरति नैकेति ॥ नैकांडोसत्रिसं
स्थाप्रलयविरचना ॥ नैकामनेकानि नैकधेतिवन्निषेधार्थनञ्शब्देन सह सुप्सुपेति समासः ॥ यानि अंडानि ब्र
ह्मांडानि तदंडमभवद्धैमं ॥ इत्याहं तमोमहदहंखचराग्निवार्भूसंवेष्टितांड इत्यादिवाक्येषु भागवते डन्त्रान्यस्तत्र

नैकांडोसत्रिसंस्थाप्रलयविरचना जायते यस्य दृष्ट्या येनोद्धृतश्च भूमेरुपहृषतरुधा वासये वाष्पतूलः ॥ ग्रामो
न्नीर्णा यदंघ्रिप्लवमिह जनता कुस्तरं वत्सपादं कृत्वा संसारसिंधुं नृपकुलतिलकं नौमि नारायणं तम् ॥ २ ॥

अंडं ब्रह्मांडवाचकत्वं प्रसिद्धम् ॥ तेषामुत्पत्तिरुद्भवश्च जनिरुत्पत्तिरुद्भव इत्यमरः ॥ संस्था स्थितिश्च ॥ संस्था स्थितौ
वरे नाशेऽप्यंतिसादनुपयोरपीति विश्वः प्रलयः क्षयश्च ॥ प्रलयः कल्पः क्षयः कल्पांत इत्यपि समरः ॥ तेषां विर
चना निष्पादनं परिस्पंद इति यावत् ॥ स्पंदनापरिस्पंद इत्यमरः ॥ यस्य नारायणस्य दृष्ट्या वीक्षणेन दृष्टिर्धीर्दर्शना
क्षिणीति विश्वः जायते प्रादुर्भवति ॥ प्रसिद्धमेतद्भागवते तत्र तत्र सृष्टिप्रकरणेषु येन नारायणेन ॥ भूमेः पृ ॥१॥

थिव्याः सकाशात् उरुधा अनेकविधः उपहृषत उपधर्मः पाषंडधर्म इत्यर्थः ॥ उपधर्म उक्तो भागवते ऽधर्मपादत्वे
न विधर्मः परधर्मश्च आभास उपमा छल इत्यादिना वासया वातसमूहेन ॥ पात्रादिभ्यो य इति समूहे ष्यः ॥ स्त्रिया
मीदृढिरमैकाचसयो निश्चाणिनामचेत्यमरः स्त्रीलिंगानुशासने तल्लक्षणे ये निकटं नत्राद इति वचनात्स्त्रीत्वम् ॥ तूलः
पिचवादि तूल इव ॥ तूलः पिचाविति विश्वः पिचुः कर्पासः उद्धृत उत्पाटितः उन्मूलित इत्यर्थः ॥ उत्सृष्टो वाद्भूतो तेः कर्मणि
क्तः प्रसिद्धमेतन्मात्र प्रमाणापेक्षा जनता जनसमूहः ग्रामजनबंधुभ्यस्तलिति समूहे तल् ॥ तलंत इति स्त्रीत्वम्
इह संसारे यस्य नारायणस्य ॥ अंघ्री चरणौ पदंघ्रिश्चरणोऽस्त्रियामित्यमरः ॥ तावेव प्लवः उडुपम् उडुपं तु प्लवः को
लड्ड इत्यमरः प्लवः कारंडव इति विश्वश्च ॥ नम् ॥ प्राप्य अधिगता सती ॥ कुस्तरं कुःखेनापि तरणान् ॥ ईषदर्थे कः पुरुकृत्
इत्यर्थे पुरवलिति कृत्वार्थे खल् ॥ संसारसिंधुः संसारो जन्ममरणादिरूपः प्रवाहः स एव सिंधुः समुद्रस्तम् ॥ सिंधुः
समुद्रे नद्यां चेति विश्वः ॥ वत्सपादं वत्सस्तर्णकस्तस्य पादश्चरणस्तं तद्रूपमित्यर्थः ॥ कृत्वा वत्सपादमिवागणय्ये
त्यर्थः ॥ उत्तीर्णा परपारगामिनी भवतीति शेषः ॥ स्ववांछितचतुर्विधाम्नेनमं मोक्षमधिगच्छतीति भावः ॥ उत्सृष्टोऽन्तर
र्नेगसार्थो कर्मके ति कर्तरि क्तः ॥ कुलद्रूतो रिति त्वम् ॥ रयरत्वं दीर्घत्वं निष्ठातस्य नत्वं णत्वं च ॥ नृपकुलतिलकम्
नृपो धर्मस्तस्य कुलं वंशः तत्र यस्तिलकमिव तिलकम् ॥ धर्मवंशस्य ललाटस्य तिलकवच्छोभाकारकमित्यर्थः

 

नारायणांनराणांमनुष्याणांसमूहोनारं तस्यसमूहइत्यण्प्रत्ययः॥ अयतेप्राप्नोतिशरणागतानितिअय
नःशरणइत्यर्थः॥ कृत्तेरिच्युदनारस्यायनोनारायणस्तंपूर्वपदात्संज्ञायामगइतिणत्वम्॥ स्वशरणागता
नेकनराद्यनुग्रहार्थमेवश्रीनारायणर्षिरूपेणावदरिकाश्रमेपूर्वंवर्त्तमानमित्यर्थः॥ यद्वा नरस्यमनुष्याकृते
धर्मदेवस्यापत्यंपुमान् नारायणः नडादित्वात्फक् आयनादेशः रषाभ्यामितिणत्वंच तं॥ यद्वा॥ नराणांश्रीराम
नंदस्वाम्याश्रितानांमनुष्यजातीनांपुरुषाणांस्त्रीणांचअयनमाश्रयस्तंदेवनारायणमित्यर्थः॥ पृषोदरादिभ्यश्चेति

यदुग्रमरश्मिर्नमहश्चयैस्तमोविभेत्तुमीशोप्यभवन्निजोजसा॥ तनोदयस्तंकृतपस्तनूजनिंनमामिपाथोजभवा
द्यधीश्वरम्॥२॥ स्वार्थिकोऽस्वार्थिकाःप्रत्ययाःप्रकृतितोलिंगवचनान्यतिवर्त्तंतइतिपुंस्त्वम्॥ गुर्वादिप्रत्ययप
देवर्त्तमानमित्यर्थः॥ नमनोमिनमस्करोमि॥ स्रग्धराछन्दः॥ म्रभ्नैर्यानांत्रयेणत्रिमुनियतियुतास्रग्धराकी
र्त्तितेयमितितल्लक्षणात्॥३॥ अथेतृणांसिध्यर्थंपुनरपियुग्मेनमंगलमाचरन्नमस्करोतियदिति उग्ररश्मिः
उग्रमात्यन्तितेजोविशिष्टत्वात्कृत्वातपकराः॥ यद्वा ग्रीष्मकालिकत्वाध्वांतनिवारणातिप्रवीरत्वमयः अत्रावो
यमत्यतथोक्तः॥ रश्मिरंशौप्रग्रहेचेतिविश्वः॥ उग्ररश्मिःसूर्यःअत्रउग्रःस्यादातपेग्रीष्मइतिविश्वप्रकाशो ॥८॥

कःग्रीष्मार्थवाचिनोहमनाश्रेनग्रीष्मकालवर्त्तिप्रकाशाधिक्यैःतल्लक्षणात्तथाचसूर्यैःभेद्यध्वांतनिराशानस
मर्थ्यौकमत्येते॥ महश्चयैः महसांतेजसांचयाःसमूहास्तैस्तेजःपुंजैःमहोभवेदुत्सवतेजसोश्चेति॥ चयःसमूहेप्रा
कारमूलबंधेसमाहृताविति च विश्वः॥ यत्तमोंधकारंतमोंधकारेस्वर्भानोइतिविश्वः निजौजसानिजेनात्मीयेन
निजमात्मीयइत्युभयोरितिविश्वः ओजसाबलेन ओजस्तेजसिधातुनामवष्टंभप्रकाशयोः ओजोबलेचदीप्तौ
चेतिविश्वः॥ यद्वा ओजसादीप्त्या॥ विभेत्तुंविनाशयितुं ईशः प्रभुःसमर्थइतियावत्॥ ईशःप्रभोशंकरेस्यादितिवि
श्वः॥ नाभवन्नबभूवभवतेर्लङ्॥ तत्तमःतमःशब्दवाच्यमोहात्मकमज्ञानंयोधर्मात्मजः॥ तनोदस्याश्रितांतः
करणाद्विनाशयामासेत्यर्थः॥ विक्षेपार्थान्नुदनेर्लट्॥ अतःस्वाध्यदर्शनोऽयमितिभावः कृततपस्तनूजनिं
कृतपोधर्मः॥ तपश्चांद्रायणादौस्याद्धर्मेलोकांतरेऽपिचेतिविश्वः॥ तस्यतनूजनिःकायोदेहः॥ क्लीबपुंसोःस्त्रि
यांमूर्त्तिस्तनुस्तनूरित्यमरः॥ तस्याःसकाशाज्जनिरुत्पत्तिर्यस्यतं जनीसीमंतिनीवध्वोरुत्पत्तौवृजनिर्मतेतिवि
श्वः॥ पाथोजभवाद्यधीश्वरंपाथउदकंकबंधमुदकंपाथइत्यमरः॥ तत्रजायतेसतत्पाथोजंकमलंतस्माज्जवोज
न्मयस्यसपाथोजभवोब्रह्मासआद्योमुख्योयेषांशिवादीनांतेषामधीश्वरःपतिस्तं॥ पर्यायोक्तविधयानाराय
णमित्यर्थः॥ नमामिनमनेनतद्गुणाननुवर्णयितुमंतःस्थंकरोमीत्यर्थः॥ नमतेर्लट्॥ अत्रोपमानभूतानुग्रमर

श्रे र्नारायणस्याधिक्यवर्णनात् व्यतिरेकालंकारः॥ तथाहवाग्भट्टः॥ केनचिद्यत्र धर्मेण द्वयोः संसिद्धसाम्ययोः
भवत्येकतराधिक्यं व्यतिरेकः स उच्यत इति॥ इतोऽग्रे श्लोकानां चत्वार्यष्टं च लंजनतातुचन्द्राभ्युदीरितं नराविति
लक्षणात्॥ २॥ प्रदर्शयंतमिति जनतां जनसमूहम् कुरासदं भगवत्कथाविमुखैर्दुःखेनाप्यास्वादयितुमशक्य
म् यत्त्वन्नजं सधर्मि दोरवनानुवादाच्छ्रु एवं तैर्येऽस्मविषयाः कुकथामतिघ्नीरिति भागवतोक्तेः॥ श्रियां शोभा
संपत्तिपद्मादीनाम्॥ शोभासंपत्तिपद्माफललक्ष्मीः श्रीरिवहृन्नपत इति वाग्भूतः आश्रयं निवासस्थानम्॥ यद

प्रदर्शयंतं जनतां कुरासदं पदं श्रियामक्षरगोत्रमाश्रयम्॥ वृषावनोपान्तमनोहराकृतिं चरित्रविस्मापितभक्तसं
चयम्॥ ३॥
पेक्षपाक्षमपत्नाेभाद्योविशिष्टानभवंतीत्यर्थः॥ अक्षरगोत्रम्॥ अक्षरमितिगोत्रं नाम यस्य त
त्॥ गोत्रं नाम्नि कुले क्षेत्रे कानने चित्रवर्त्मनोः संभावनीये बोधेऽपीति विश्वः॥ यद्वा॥ नक्षरति ध्यासंतिकलये
ऽपिनाशं नयाप्नोतीत्यक्षरः गोत्रः नातशृंगनामा पर्वतो यत्र तत्तम् गोत्रः क्षोणिधरे मत इति विश्वः॥ यद्वा॥ अक्षराः
क्षरणधर्मरहिताः यागादयो वेदलक्षणा वाचस्ताः त्रायते आसंतिकलयेऽपि पालयतीति॥ अनेन आसंतिक
लयेऽपि मूर्तिमंतो वेदाः अविनाशिवाभिर्येस्य वंतीति सूचितं॥ यद्वा॥ अक्षराः अक्षरयामुक्ताः गोत्रे वर्त्मनि ॥८॥

यत्र तत्॥ वर्त्मन्यसुपलक्षणं श्रीवासुदेवदर्शनार्हस्थानानाम्॥ यत्र श्रीकृष्णदर्शनार्थं मार्गे मार्गे अग्रेषु च स्था
नेषु अक्षरमुक्ताः प्रतिरतंतीति भावः॥ यद्वा॥ नक्षरतीत्यक्षरं गोत्रं बोधो ज्ञानमिति यावत्॥ यस्याः सचासौ मा ल
क्ष्मीस्तस्या आश्रयं निवासस्थानमित्येकं पदम् तदा श्रियामित्यस्य पदमित्यनेनान्वयः॥ मः त्रिविमा रमायां चेति वि
श्वः॥ यद्वा॥ अक्षं चक्रं राति गृह्णातीत्यक्षरश्चक्रधरः श्रीवासुदेव इत्यर्थः॥ अक्षः कर्षे तुषे चक्रे इति विश्वः॥ चक्रपा
णिश्चतुर्भुजं इत्यमरः॥ सः गोत्रे कानने यत्र तत् यत्र कानने पुगोपीभिः सह क्रीडार्थं श्रीकृष्णस्तिष्ठतीति भावः॥ एत
हृत्वां पदं अक्षरधामाख्यं स्थानं पदं व्यवसितत्राणस्थानलक्ष्मांघ्रिवस्तुष्विति समरः॥ प्रदर्शयंतं दर्शनं विधापयंतम्॥
समाधावितिशेषः॥ वृषावनोपान्तमनोहराकृतिम् वृषो धर्मः वृषः स्यात् वासके धर्म इति विश्वः॥ तस्यावनं रक्षण
तदर्थमुपान्ता गृहीता मनोहरा चित्तहारिणी आकृतिर्वपुर्येन तं तथोक्तम्॥ धर्मावनायोरुकृतावतारः धर्मस्य गु
प्त्यै इति च तत्र तत्र भागवते बहुशः धर्मरक्षणार्थमेव भगवतोऽवतारहेतुत्वोक्तेः॥ पातुं धर्मम धर्मसुतत्वनियं तु
मिति स्फुटं तत्रोक्तेश्च॥ चरित्रविस्मापितभक्तसंचयम्॥ चरित्रेण चरितेन लीलयेति यावत्॥ विस्मापिता विस्मयं
गमिता भक्तानां संचयाः समूहा येन स तथोक्तस्तम्॥ नमामीति पूर्वेणान्वयः विपूर्वकात्स्मयतेर्हेतुमण्णेनिस्मि
स्मयतेरित्यात्वं अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातांपुगिति पुकि विस्मापितेति सिद्धम्॥ अक्षरगोत्र

मितिपद्यार्थेत्रस्यैवैवर्त्तपुराणस्थः श्रीकृष्णजन्मखंडः स्कांदा विष्णुखंडांतर्गतेवासुदेवमाहात्म्यं च भारते चां
तिपर्वणि मोक्षधर्मस्थं नारायणीयाख्यानं च प्रमाणमवधेयम् ॥ ४ ॥ एवं चतुर्भिः श्लोकैः श्रीनारायणं प्रणम्य
केन भगवद्भक्तसाधुजनान्प्रणमति तदिति ॥ तदंघ्रिपंकेरुहदिव्यसौरभप्रसक्तचेतोमधुपान् तस्य श्रीस्वामिना
रायणस्य अंघ्री चरणौ तावेव पंकेरुहे सरसीरुहे तयोः संबंधी दिव्योयः सौरभः परिमलस्तत्र प्रसक्ताः आसक्ता
श्चेतांस्येव मधुपा येषां तेतांस्तथोक्तान् ॥ पदंघ्रिश्चरणः स्त्रियां पंकेरुहं तामरसं सारसं सरसीरुहमिति चामरः

तदंघ्रिपंकेरुहदिव्यसौरभप्रसक्तचेतोमधुपान्वरीयसः ॥ जितेंद्रियस्वांतनिजांतरद्विषः सतोऽभिवंदे करुणा
र्द्रचेतसः ॥ ५ ॥ यद्यपि सामान्यपरिमलो विमर्दोत्थ मनोहरगंधयोस्थापि फलतो पमर्दविकसच्छरीरसंगादि सौरभे
पुंसी समरप्रथमकांडे तु द्विवर्गे आख्यातस्थायां विशेषो स्यस्तथापि अत्र सौरभशब्देन सामान्यतः परिमलपर्या
यः सौरभशब्दो गृहीतव्यः विशेषेण सामान्यग्रहणस्याप्यौचित्यात् ॥ यथा नैषधे तदाननिंदज्ञ पुष्पपल्लवं स्वग
तस्य विशेषभूतात्मपर्णवाचिनापल्लवशब्देन सामान्यतोमहत्परसमत्कृतत्वात् ॥ तथा नंगीकारेपल्लवस्यतत्र
वर्णितं मधुप्रोपमानत्वं नघटते वेसल भे तदत्ति प्रपंचेन प्रपंचितं चैतदस्माभिर्धरभैर्षिवैणिकाकौविदानंदयो ॥ 

स्ततो वोद्धव्यं ॥ गरीयसोः ॥ तिशयेन गुरवः धर्मज्ञानवैराग्यभक्त्यादिगुणैरिति विग्रहः वरीयस इति पाठे अतिशा
येन वराः सद्गुणैः श्रेष्ठाः वरीयांसस्तान् वरो जामातरि वृतो देवतादेर्वरभीप्सिते ॥ विड्ढेपुंसि त्रिषु श्रेष्ठे कुंकुमे तु न
पुंसकमिति विश्वमेदिन्यौ ॥ यद्वा ॥ वृणोतेराच्छादने इति तस्मात् अच् इति वृ प्रत्ययो गुणो प्राकृतस्वश्रेष्ठे गुरु
त्वात् महद्गुणवाचकः ततो मतुपि उरु गुणयुक्ताः वर तो महांतः पुरुषा इत्यर्थः ॥ गुणवचनेभ्यो मतुपो लुगिष्ट इ
ति मतुपो लुक् ॥ ततो ॥ तिशायनार्थे द्विवचनविभक्त्योपपदे तरबीयसुनाविति तरुजा ईयसुन्नत् प्रियस्थिरस्फि

प्रचंडपाखंडविखंडनक्षमश्रितांतरारिक्षपणेक्षणो हरिः ॥ ददातु मे मुग्धस्मितस्मिताननो मतिं सतीं सर्वजनीनविक्र
मः ॥ ६ ॥ रोरुबहुलेसादिना उरुशब्दस्य वरादेशः अतिशयेन उरवो वरीयांसस्तान् प्रख्यातसद्गुणान्महापुरुषानि
त्यर्थः जितेंद्रियस्वांतनिजांतरद्विषः इंद्रियाण्युपस्थादीनि स्वांतं मनः करणं च निजा आत्मीया अंतरद्विषः कामा
दिरूपाश्च जिता स्तैर्यैस्तेतांस्तथोक्तान् निजमात्मीय पदं द्वयोरिति विश्वः करुणार्द्रचेतसः करुणयार्द्रं मृदुः सदया
नेतस्तं करुणेच्छाजन्मादयातयार्द्राणि द्रवीभूतानि चेतांसि येषां तान् सतः साधून् सत्सज्जे विद्यमाने च सत्साध्वाहि
तसाधुष्विति विश्वः अभिवंदे अभितः आभिमुख्येन वा नमस्करोमीत्यर्थः ॥ ५ ॥ इत्थं मे केन साधुजनान्नमस्कृत्य

दानीं श्रीहरिचन्द्रवर्णनक्षमां सन्मतिं हरिमि केनयाचते प्रचंडेति प्रचंडाः कुर्वद्दर्पाः पाखंडाः प्रचंडाः कुर्वद्दर्पैस्तेन क
रवीरेप्रतापिनीतिविश्वः मेदिनी॥ पापं सन्वंतीतिपाखंडाः॥ षणुदाने॥ स्मात्प्रमाताडुः॥ पृषोदरादित्वात्साधुः॥ श्री
मज्जागवतेनुतानिपापस्य खंडानि लिंगं पंडमितिहोच्यतकुसुन्कम्॥ तदापापस्य खंडं वृक्कं पाखंडं तदस्त्यस्य ते ऽत्रेतिपाखं
डः॥ अर्शआदिभ्योऽच्॥ कवर्गद्वितीयमध्यपाठेतुपांतीतिपाखंडः धर्ममर्यादास्ताः खंडयतीतिपारखंडः॥ पालना
च्चत्रयीधर्मः पात्राङ्केन निगद्यते॥ तं खंडयंतीति तेयस्मात्पाखंडास्तेनहेतुनेति आरब्धा कथा मरदीकायां तन्निरूः
क्रिया॥ पृथुयकलंभंगोद्यतेंदानीतयद्विंशाद्वेदवं तोनग्नरक्तपटादयस्तेषां विखंडनं विनाशं ननंतत्रक्षमः ऋक्तः॥
श्रितानिजाश्रितजनास्तेषां मंतरायः कामाद्यंतः त्रावत्तेषां क्षयणं विनाशं कमीक्षणं दर्शनं यस्य स चासौ स
अर्द्धक्षणं दर्शने दृष्टाविति विश्वः॥ मुग्धमितस्मितानन मितं स्वल्पं यत्स्मितं हास॥ मुग्धं सुंदरं मितस्मितं यत्रत
न् मुग्धस्फकं दरे मूढ इतिमेदिनी॥ तथाभूतमाननं मुखं यस्य सः॥ सर्वजनीनविक्रमः॥ सर्वेभ्यो जनेभ्यो हितः सर्व
जनीनो विक्रमः पराक्रमश्चरित्राणि वा यस्य सः॥ हरिर्भगवान्॥ पूर्वकालैकसर्वेतितत्पुरुषसमासः॥ सर्वजनात्त
त्खञ्जौ तिखप्रत्ययः॥ आपन्नेयानीयिदतीनादेत्राश्चं मेमल्हम् सती भगवत्गुणवर्णनाभ्यार्हितास्॥ यदा॥ एकस्मि
न्नकलकारणकारणे निष्कारणापारकारुण्यवतिराधारमाकांतेश्री वाक्यदेवेप्रसोगुणवर्णनप्रवर्तनरूपंशो ॥११॥

भनं चरित्रमस्यास्तीतिसतीतिनाम्॥ अस्यभविटलः॥ मात्रादेशाश्रसोरल्लोपः॥ तुगितस्खेतितुशीपू मतिं बुद्धिम् बुद्धिर्म
नीषाधिषणाधीः प्रज्ञाशेमुषीमतिरित्यमरः॥ यद्वा॥ मतिमिच्छास्मृतिं वा मतिः स्त्रीच्छाधियोः स्मृतावितिमेदिनी
ददातुमह्यंमिस्तेप्रेरयतु॥ अत्र मतिदानं प्रबंधरचनायुक्तिस्फुरणाम् प्रार्थनायां लोट्॥ अनुप्रासोऽलंकारः तुल्यश्रु
त्यक्षराद्यावृत्तिरनुप्रासः स्फुरद्गुणः॥ अतस्सदृः स्याच्छेकानानां सादानांतस्पदश्चस इतिवाग्भटालंके॥ ४॥ संप्रति कविः
कालिदासादिमहाकविविश्वविस्तृतग्रंथादौसम्यगाचरितस्वाहंकारपरिहारप्रदर्शनेनतथाविधित्रिपाचारपा

कत्रोमुरारीमेः विदुषः स्थवीयसी क्रमंथनं क्षीरनिधेर्गरीयसः॥ क्रियासु राणुः किलयत्र मंदरो निमज्जति क्षोणि
धरोमहानपि॥ ५॥ अनेन विद्वदनुग्रहमिच्छुः स्वकृतग्रंथे निर्मत्सराः ततः पठनपाठनचिंतनद्वारा प्रवर्त्तयितुमा
दौस्वयमपिस्वाहंकारं चतुर्भिः परिहरतिकेति॥ वेत्तीति विद्वांस्तथाभूतो न भवतीत्यविद्वांस्तस्य विदन्ज्ञाने॥ स्माल्लट
शत्रादेशाः विदेः शतुर्वसुः इति वसुरादेशाः विद्वान्ज्ञानिनिधीरश्चविद्वानध्यात्मवेदकः इतिधरणिकोशात्गदविदुषो
ऽमलबुद्धिसङ्घावे॥ पिधैर्यरहितस्येत्यर्थः॥ यद्वावेत्तिकाव्यगुणागुणादोषादोषान्नितिविद्वान्दोषज्ञः विद्वान्वि
पश्चिद्दोषज्ञः संख्यावान्संदितः कविरित्यमरः॥ तथाभूतोनभवतीतितस्यमेममस्थवीयसीअतितुच्छेनस्थूला॥

॥१३॥ द्विवचनविभक्त्येसादिनास्थूलत्रास्याधादिय‑‑नुन्नस्यः स्थूलह्रस्वक्षुद्रेसादिनास्थूलस्य लकारलोपो गुणादेशश्च ॥ उ
गिलश्चेति ङीप् ॥ नोमुषीनोनेइति नोः विद्युमोहस्त्वंमुष्णातीति मुषेस्तये ॥ मूलविभुजादित्वात्कः गौरादित्वान्ङी
ष् ॥ बुद्धिः बुद्धिर्मनीषाधिषणाधीः प्रज्ञाशेमुषीमतिरित्यमरः ॥ कगरीयसोऽतिशयेनगुरोर्महत्तरस्येति यावत्तु ॥
द्विवचनविभक्त्येसादिनागुरुशब्दादीयसुन् प्रियस्थिरेत्यादिनागुरोर्गरादेशश्च वरीयसइतिपाठे ॥ अतिशयेन
वरोऽगाधत्वादिगुणैः श्रेष्ठस्तस्य वरोजामातरिइनोदेवताद्रेरभीप्सिते ॥ विद्धः पुंसित्रिषुश्रेष्ठइतिमेदिनी ॥ क्षीरनि
धेः क्षीरसागरस्यतस्य प्रभेदाः क्षीरोदइत्यमरः ॥ मंथनं विलोडनम् ॥ काको कृत्वा होमहदंतरंसूचयत ॥ यत्र क्षीरसा
गरे ॥ मंदरोमंदराद्रिः ॥ क्षोणिधरः शैलः महीध्रेशिखरिक्ष्माभृदहार्यधरपर्वताइत्यमरः ॥ निमज्जतिनिमग्नोभ
वति तत्र सागरेमहानपिसजातीयेभ्यः सर्वेभ्योगुरुरपि ॥ परमाणुः परमाणुः परमंयस्मादणुत्वात्स्यएवयंपरमः प
रेइतिविश्वकोशः परपरमशब्दयोरेकार्थत्वात्परमाणुः परमाणुर्बोध्यः क्रियान्किंपरिमाणः तत्किंविदित्यर्थः ॥ कि
मिदंमामितिकिमुपपदान्मातृलुप् वमयादेशश्च ॥ किमिदमोऽशितिकिरादेशः ॥ यस्येतिचेतिकारलोपः ॥ आपनो
पातिघस्येयादेशः ॥ उगिदचामितिनुमागमः ॥ पयात्यमतिः समुद्रमंथनोद्युक्तोपितत्कर्तुंनशक्नुयात्तद्वदहम
पिहरिचरित्रवर्णनारम्भकाव्यनिर्माणाय कृतोद्योगोऽपि कथं तत्पारं यास्यामीतिसाशंकस्तत्रप्रवृत्तोऽस्मीत्यर्थः ॥१३॥

विषमालंकारः वस्तुनोयत्रसंबंधमनौचित्येनकेनचित् ॥ असंभाव्यंवदेद्वक्तानमाकुर्विषमंयथेतिवाग्भट्टोक्तेः
७ ॥ अथस्वस्यकाव्यनिर्माणाक्षमतांयुगपेनाहतदीयेतिमणेरिति ॥ अल्पतेवार्यतेस्वक्ष्मशाऽर्थविचारेऽस्येस
ल्पा अलभूषणादौवाकुलकात्पः स्तोकाधीमेतिर्यस्यसोऽल्पधीः स्तोकबुद्धिः स्तोकाल्पक्षुल्लकाइत्यमरः ॥ अ
लब्धामनधिगतानिसाधनानिकोशव्याकरणरसालंकारछंदः प्रभृत्युपायायेनसः साधनं मृतसंस्कारेसैन्येसिद्धौ
उपायेगतौनिर्वर्त्तनोपायमेद्रनेदापनेऽनुगमधनइतिमेदिनी तस्यहरेरयंतदीयः संबंधोगुणचरित्रादिवर्णनयोगो

तदीयसंबंधमलब्धसाधनोविधित्समानः किलकाव्यमल्पधीः ॥ कविप्रवर्यस्यवयःपतेरिवप्रयातुमत्र्यंमनाक्
समुत्सुकः ॥ ८ ॥ मणेः परीक्षामिवशाककविक्रयी विधातुमुद्युक्तइवाग्रतोविदः ॥ वदन्सभायामपटुर्विपश्चितां
नोवजिष्याम्युपहास्यतामहम् ॥ ८ ॥ यस्सतत् ॥ काव्यंग्रंथम् ॥ काव्यंग्रंथेइतिविश्वः ॥ विधित्समानोविधातुमिच्छन्
विपूर्वात्सनंताद्धधातेः शानच् अहम् अस्माकम् अल्पनभः स्वर्गबलाहकेष्वितिविश्वः प्रयातुंगंतुंमुसमुत्स
तन्तुकपनमनाक्: सपक्षः कीटविशेषः मशकोरोगकीटप्रभेदयोरितिमेदिनी ॥ वयःपतेः पक्षिराजस्यइव गरुत्मा
नगरुडस्ताक्ष्यौ वैनतेयः खगेश्वरइत्यमरः ॥ शाकं विक्रीणातीतिशाककविक्रयी हरितकविक्रयकारकः शाकंहरि

हरिसं.
॥१३॥ सर्ग.१

तकं त्रिपुरिसमर॥ विदोमणिपरीक्षावेदिनः पुरुषस्य अग्रतः पुरतः मणेः रत्नस्य परीक्षा समीचीनविवेकम्॥ वि
धातुं कर्तुम्॥ उद्युक्तोहमेतत्परीक्षां करिष्यामीत्येवमुक्त्वा मणेः परितोदृक्नेत्रेणाद्युद्योगयुक्तः सन्निव विपश्चि
तां पंडितानाम्॥ विद्वान् सुधीः कृविविचक्षणलब्धवर्णाज्ञः प्राप्तरूपकृतिकृष्टाभिरूपधीराः॥ मेधाविकोविदवि
शारदसूरिदोषज्ञाः प्राज्ञपंडितमनीषिबुधप्रबुद्धाः॥ व्यक्तो विपश्चिदिति हैमः॥ विपश्चितं निश्चिनोति चेतति चिंत
यति वेति पृषोदरादिः सभायां समज्यायाम्॥ समज्या परिषद्गोष्ठी सभासमितिसंसदइत्यमरः॥ वदन्नुद्गृह्णनादनं
गतिआतानंदकवींद्रनिर्मितप्रबंधस्य क्षेमपथेनवात्रमे॥ अगाधसिंधावबलस्य देहिनो विधापिते तेन नृपेण सेतु
ना॥१८॥ कुर्वन्नपदुर्दक्षस्तनः पटुस्तीक्ष्णोस्फुटेदक्षे निष्ठुरे निर्दयेः पिचेतिरुद्रः तद्भिन्नोऽपटुर्मंदः जनः मूढाल्पापटुनि
र्भाग्यामंदाः स्युरिति हैमः॥ अरः सद्व कृविप्रवर्यस्य कविश्रेष्ठस्य जीवे प्रधानप्रमुखप्रवेकानुत्तमोत्तमाः मुख्यवर्य
वरेण्याश्च प्रवर्हानवराध्यवत्॥ परार्ध्याग्रप्राग्र्यहरप्राग्र्याग्र्याग्रीयमग्रियम्॥ श्रेयान् श्रेष्ठइत्यमरः॥ उपहसितुं
योग्यमनुपहास्यस्तस्य भावस्तत्ता ताम् उपपूर्वाद्धसतेर्कृत्य ह्लोर्ण्यदिति ण्यत्॥ ततस्तत्तलंतत्वात्स्त्रीत्वम् व्रजिष्या
भिगमिष्यामि मालोपमाख्येयमलंकृतिः॥७॥ एवं श्रीहरिचरित्रवर्णने मम वंधरचनेरस्मान्नाव्यतामुक्त्वाप ॥१३॥

क्षांतरेन भः पतं सात्म समं पतत्रिणः इति माघ प्रमात्मनि निधाय आतानंदमुनिकृतसेतुस्पर्द्धिप्रबंधदर्शनोक्तता
कथं विद्वरिसंभवचरित्रप्रबंधकल्पने आत्मनः नाव्यतां संभावयन्नाह गतिरिति॥ वेतिपक्षांतरे॥ अत्र श्रीहरिगु
णचरित्रवर्णने आतमुक्तसेन्द्ररनातगुणआनंदोयस्मिन्नस्य आतानंदः आनंदः आनंदमयोभ्यासादिति माघ प्रतिपा
दितः श्रीवासुदेवः समासाक्षाल्लेनोपास्यतया निद्ध्यनेऽस्येति आतानंदः अवृंआदित्वादच्॥ आतानंदकृत्सभिधायस्य
स चासौ कवींद्रः नाकपार्थिवादित्वादुत्तरपदलोपी समासः तेन निर्मितोयः प्रबंधः सएव क्षेमपंथा निर्विघ्नमा
सवापत्नायात्मनार्महादिभिर्गुणैर्भवोच्छेदकरैः प्रणोदितः॥ करोमि तत्र्याप्यममप्रवोहरेर्यथामनीषंचमतांप्रस
त्तये॥२१॥ गीः कृकूपूरवधूरिसादिनासमासांतोऽप्रत्ययः तेन अगाधोऽगाधावासिंधुः समुद्रोनदीवातस्याम्॥ अ
स्थाघास्थागमस्ताघं तलोगाधातलस्पृनागवितिहैमः॥ सिंधुर्नासरितिस्त्रियामित्यमरश्च॥ नृपेण येन केनापिरा
ज्ञाविधापितेन कारितेन॥ सेतुनाल्पालिना सेतुर्नालो कुमारकेइति मेदिनी॥ अबलस्याबुध्युघनासमर्थस्य॥ दे
हिनः शरीरिणाइव मे गतिः अस्तिउपमा॥१८॥ संप्रति प्रस्तुतद्विधानप्रवृत्तो कारणमाहमइतिसपूर्वश्लोकोक्त
प्रकारः॥ अहमिविसानंदनामाकविः॥ नार्मेणाः स्वस्वादमामनार्मणिडुः स्वानिता निहरंती सेवंनीलैः स्वप्नजाता

विनिताच्छीरवेलानिः॥ नार्यस्त्रांतिफरवानि चेत्यमरः॥ भवस्य संसारस्य उच्छेदो नाशस्तस्य कारी विधायके॥ भवः क्षेमे
च संसारे सत्तायां प्राप्तिजन्मनोरिति मेदिनी॥ हरेः गुणैः अपारकारुण्यसौन्दर्यौदार्यादिभिरसंख्यजीव
हितकारिभिः कर्तृभिः॥ ममापि सानंदकवेः श्रवः श्रोत्रेंद्रियं श्रुतस्य धारः कर्णोपि स एवार्थः कर्णः श्रोत्रं श्रुतिः श्रवः श्रव
णमिति हलायुधः तात्स्थ्यात्ताच्छब्द्यमिति मायात्कर्णं वा विनाश्रवः शब्देन तत्रस्थेंद्रियग्रहणं कर्तव्यं तद्धेतेतस्य
शब्दग्रहणसमर्थत्वात्॥ प्राप्यैस चापलाय चपलस्य कर्म चापलं मविमूत्रपविधानं तत्कर्तुम्॥ युवादित्वात्कर्म
अर्हेति संश्रोतुमिदं हि साधवः शुभं तदैश्वर्यरसधारसाश्रयम्॥ तथा हि शुद्धिः पुरटस्य लक्ष्यते मलीमसत्वं च हिरण्य
रेतसि॥१३॥ एपए क्रियार्थोपपदस्येति कर्मणि चतुर्थी प्रणोदितः प्रेरितः सन् हरेः श्रीनारायणमुनेः सतां तन्म
धूनां च सत्सु त्वे विद्यमाने च ससाध्यर्हित साधु क्षितिविश्वः॥ प्रसन्नये प्रसन्नतायै प्रसतिः आराधीकरणं तदर्थं वा
पृथामनी वस्यप्रतिमनतिक्रम॥ तत्काव्यम् करोमि अत्रोत्तरवाक्यार्थं प्रति पूर्ववाक्यार्थस्य हेतुत्वात्काव्यलिंगम
लंकारः हेतोर्वाक्यपदार्थत्वे काव्यलिंगमुदाहृतमिति लक्षणात्॥ ११॥ संप्रतिस्वप्रबंधपरीक्षार्थं सतः प्रार्थयते॥
अर्हेतीति॥ तदैश्वर्यरसधारसाश्रयं तस्य हरेर्यदैश्वर्यं स्वेक्षणमात्रेणानंतजीवानां स्वस्मिन् प्राणनिरोधादिरूपसर्वस्व ॥१४॥

रभावः तदेव रसधारसो मृतरसस्तस्याश्रयमधिष्ठानम्॥ शुभम् श्रोतृवक्तृध्येतृजनानां शुभकारकम् इदं मत्कृतं का
व्यम्॥ साधवो निर्मत्सरादिलक्षणवंतः संतः संश्रोतुमेकाग्रचित्तेन तच्छ्रवणं कर्तुम्॥ एकाग्रचित्तत्वद्योतनाय
समुपसर्गः॥ अमथा श्रोतुमित्येव ब्रूयात् नामंत्रमनान्म श्रोष्यमिति श्रुतेरेकाग्रचित्तत्वस्य भावे श्रवणमश्रवणमे
वइति न्यायः योग्या भवंति तथा हि पुरटस्य सुवर्णस्य॥ सुवर्णं पुरटं भर्म कनकं हेम हाटकमित्यभिधानकोशः शु
द्धिर्निर्दोषस्वरूपता मलीमसत्वं लोहांतरसंसर्गात्मकं मलिनत्वं च मलीमसं तु मलिनमित्यमरः हिरण्यरेतसिक्र

श्रियः पतिर्ब्रह्मपुरासुरातनो हरिर्दयालुर्द्विजधर्मवेश्मनि॥ अधर्ममुन्मूलयितुं दिलीतलादवातरत्सारतरस्तर
स्विनम्॥१४॥ तभुसप्पावितियावत् हिरण्यरेता कृतभुगित्यमरः॥ लक्ष्यते नाम्यत्र तन्न दत्त्वापि साधवए वगुणदो
षविवेकाधिकारिणो नान्ये इति भावः॥ १३॥ इत्थं नमस्कारादि विधायादौ पृथामूर्तिं तं वर्णयिष्यन् संक्षेपतस्तस्या
द्भुर्भावमाह॥ श्रिय इति॥ श्रियः शोभासंपत्तिपद्मारूपायाः पतिः स्वामी शोभासंपत्तिपद्मासु लक्ष्मीः श्रीरिति
रूपत इति केशवः यद्वा श्रीर्वेषरचनाशोभेति विश्वप्रकाशात् निरतिशयवेषरचनारूपायाः शोभारूपाया वा श्रियः
पतिः स्वांगपाला रक्षक इत्यर्थः पारक्षणे स्मासात ईतिरितिडतिपुराभवः पुरातनः शाश्वतः सायंचिरमित्यादि

नात्युपसमयः तस्यतुद्वागमश्च॥ योरनादेन्नाः सनातनः न्नास्यतेइतिमेदिनी॥ दयालुःकारुणिकः स्याद्दयालुःका
रुणिकः कृपालुः सूरतः समाइत्यमरः अतिन्नायेनसारोवरः सारतरो। तिश्रेष्ठः वरेमवत्सारमुदाहरंतीतिविष्णुः
हरिः श्रीवासुदेवः दिवीतलात् महीतलात् दिवीमहीक्ष्माष्टथ्वीपृथिवीलाधरावनिरितिनामलिंगकोन्नाः।
तरस्विनंबलवंतम् अमेदुर्जेयमिसर्थः॥ तरसीबलरंहसीसमरः अधर्मं धर्मविरुद्धंसन्नारवमधर्मं न्नन्मूलयि
तुमामूलाकृत्तवान्तु॥ ब्रह्मपुरात् ब्रह्मलोकात्॥ तदुक्तंछांदोग्ये॥ एतन्नसब्रह्मपुरं अपहतपाप्मात्येषब्रह्मलो

प्रसूननाराःचमहादवानलप्रतापितस्वांतजनामृतोदधिः॥ सुकीर्त्तिमुक्तागुणरत्नवत्तपोमुनिव्रजांभोनिधिर्व
वैरीश्वरः॥२४॥ कठइत्यादिनामुंडकेपि॥ द्विष्येब्रह्मपुरेह्येष श्रुति॥ मोक्षधर्मेऽपि॥ प्राप्यावध्यंब्रह्मपुरंमिति॥
द्विजोविप्रस्तस्मादसौधर्मः श्रीधर्मदेवाख्यस्तुतस्यवेन्नमनिग्रहे॥ दंतविप्रांडजाद्विजाइत्यमरः॥ अवातरत्स्माडूर्वेभू
व॥ वंन्नास्यहृत्तम्॥ जतोतुवंन्नास्यमुदीरितंजरावितिलक्षणात्॥२३॥ युग्मेनाह प्रसूनेति प्रसूनानिपुष्पाणिना
राचाबाणायस्यसतथोक्तः कामः उन्मादनस्तापनश्चशोषणः स्तंभनस्तथासंमोहनश्चकामस्यपंचबाणाःप्र
कीर्त्तिताइतिकेचित्कामबाणामेतुस्तामपितथाविधपुष्पाण्येवज्ञेयानिअरविंदमशोकंचचूतंचनवमल्लिका ॥२५॥

नीलोत्पलंचपंचैतेपंचबाणस्यसायकाइतिवाक्येनसाधर्म्यात्सएवमहादवानलोऽसुत्कटारण्यप्रदीप्तव
ह्निस्तेनप्रतापितानिसंतापातिशयंगमितानिस्वांतानिमानसानियेषांतेचतेजनालोकास्तेषाममृतोदधिः
सुधासागरः द्रवदावोवनारण्यवह्नी॥ स्वांतंहृन्मानसंमनइतिचामरः॥ यथादावानलसंदह्यमानानांगस्यामृतो
दधिःपरमशांतिकारकस्तथाकामानलसंतप्तस्यापिताद्दशांसंतापनिर्वापयितासएकएवेतिभावः सुकीर्त्ते
यःशोभनयशांसितान्येवमुक्ताः शुक्त्युद्भवमौक्तिकानिगुणाअपारकारुण्यवात्सल्यौदार्यादयस्तएवरत्ना

जगत्पवित्रंकुरुतेहरेर्यशः श्रुतिस्फुतंयस्यपदस्पृशांपयः॥ मतिंपदीयोऽस्मृतामघक्षयेमृशाविलामप्यमली
चकारसः॥२५॥ नितांतशतानिवविद्यंतेयेषांतपः सपत्नीकः स्वयंधर्मदेवश्चमुनिव्रजामरीआदयोमुनिगणाश्च
सुकीर्त्त्यादिमंतश्चतेतपोमुनिव्रजाश्चतएवांभोनिधिःसमुद्रस्तस्यन्नावैरीश्वरः आनंदपूरप्रादुर्भावकश्चंद्रः॥ मुक्ता
रत्नादिमतोऽप्यंबुधेश्चंद्रदर्शनेनयथाप्रहर्षोर्मिमहापूरप्रादुर्भावस्तथायदर्शनेनकीर्त्तिगुणवतांधर्ममुनीना
मानंदोद्रेकोभवतीतिभावः॥ उद्वेखालंकारः सचसंबंधिभेदप्रयुक्तः समासांतर्गतस्तस्द्भेदः॥२४॥ जगदिति॥
यस्यहरेःसंबंधि॥ श्रुतिस्फुतंवेदैः स्तुतस्तवनंश्रुतिःस्त्रीवेदआम्नायइत्यमरः अस्पृशतांप्राणिनाम्॥ अघश्च

 

॥१६॥ येंहोंऽहुः खव्यसनविनाशं। अंहोऽहः खव्यसनेष्वघमित्यमरः। व्यसनमशुभम्। अतिशायेन पटुः पटीयो। अतिचतु
रम्। द्विवचनविभज्येत्यादिनेयसुन् टिलोपश्च। पटुर्दक्षे चतुरो रोगे च तुरेष्वभिधेयवदिति मेदिनी। यशः कीर्त्तिः। य
शः कीर्त्तिः समज्ञा चेत्यमरः। पदस्पृशं ब्रह्मकमंडलुजलोक्षितचरणस्पृष्टम्। पयो गंगाजलं च कर्तृ जगत्कर्मभूतम्
पवित्रीकुरुते नानाविधपापविनाशपूर्वकं पवित्रतामापादयतिस्म हरिः॥ अस्कुभृताम् भृशं विलासमतिक
लुषामपि कलुषो नच्छः आविल इत्यमरः। मतिं शरणागतबुद्धिम्॥ अमलीचकार विषयरागादिकलुषतारहि

हृदंगिनां क्षालयितुं मनोजनुःपुरःसराशर्मदहूषणावलिम्॥ स यामिनीध्वांतमलीमसीकृतं वियत्सदीयानिव
सप्तसप्तिकः॥१६॥
तामकरोत्। अत्र भृशं विलासमपीति पदस्युपमानतया प्रतीयमाना गंगा धर्माद्याचरणस्थ
स्वभावं जगत्पवित्रयतीति ध्वनयतीति तेनायमुपमेयाधिक्यपर्यवसायी व्यतिरेकालंकारः प्रतीयते॥ तथा भाग
वते॥ विष्णुस्तवामृतकथोदवहास्त्रिलोक्यां पादावनेजसरितः शमलानि हंतुमिति रावं स्वभावोयमितिभावः॥१५
उक्तमेवार्थमर्थांतरेणाह हृदिति॥ स हरिः मनसो मनसिवाजनुरुस्रात्रिर्यम मनोजनुः कामः शंवरारिर्मनसि
जः कुसुमेषुरनन्यज इत्यमरः। सपुरःसरा मुख्या येषां तानियाति अत्रार्मदाम्भनिरुः खपदानिहूषणानिनेरावि ॥१६॥

तं मलिनम्। अंगिनां देहिनाम्। स्वान्तमनः स्वांतं हृन्मानसं मन इत्यमरः। सप्तसप्तयोऽश्वा यस्य सः। वाजिवाहार्वगंध
र्वहयसैंधवसप्तय इत्यमरः॥ सप्तसप्तिकः सूर्यः सूर्योऽर्कः किरणाहृसारभ्यावकाज्जाहर्बाधवः सप्तसप्तिरितिसू
र्यनामस्कृदेमः॥ यामिनी रात्रिस्तस्याध्वांतेनांधकारेण मलीमसीकृतं मलिनीकृतम्। मलीमसं तु मलिनमित्यम
रः॥ वियदाकाशमिवावियद्विष्णुपदं वा तु पुंस्याकाशविहायसी इत्यमरः॥ क्षालयितुं निर्णेक्तुम्। सदीयानतिस
मर्थः॥ आस्तीतिशेषः यथाक्षणदातिमिरनिकरच्छन्नं नभो रविं विनाऽन्यो विमलीकर्तुं नक्षमः कस्तथाकामादिदो

हृताधिरधुर्वरसंगधारिणां प्रसूनबाणादिमदूषणव्रजम्॥ यथोग्रदावं वपुनेन वारिणा भृशं स निर्वापयति स्म
नीरदः॥१७॥
आविलं मनो विमलीकर्तुं शक्तो हरिं विनान्यः कः स्यादिति भावः॥ अत्रोपमालंकारः॥ अत्र वहिर्गा
पकतिमिरविनाशकात्सूर्याद्दूषणनाशकत्वप्रतीयमानाऽतिवार्यस्वांतध्वांतनिराकरणोक्त्योपमेयस्य हरेराधिक्य
प्रतिपादनाद्व्यतिरेकोऽपि॥ यथा सूर्यस्तथा हरिरितिसादृश्यप्रतीत्या दृष्टांतालंकारोऽपि। निदर्शनातु नात्र प्रवर्त
ते असंभवद्वस्तुसंबंधसंभवे तत्स्यादनिदर्शनात्॥१६॥ आदिक्रियाकुलकमाह॥ हृताधिरिति शरच्छशांकक्षिता
विसधुर्वरस्य॥ अव्ययं विभक्तिसमीपेति विभक्त्यर्थेऽव्ययीभावः॥ कुछ नीतिक्रूगतावस्थामचाद्यविशरारु

णामर्णव्र्वरा॥ यद्वा॥ उर्वी हिंसायां खुनोद्य चेतिग्रः उपधायां चेति दीर्घस्य संज्ञापूर्वकत्वान्न। उर्वरीति तिकः॥ यद्वा
संपदादिक्विप् एत्वलोपः उरवासौ र्वरा च उर्वरा उर्वरा तु भूमिमात्रे सर्वसस्याढ्यभूम्यपीति हैमः॥ अंगधारिणां
देहिनाम्॥ कृतान्याधिर्मनोव्यथात्येन सतथोक्तः पुंस्याधिर्मानसी व्यथेत्यमरः॥ महर्षिः तेषामिति निर्दोषः॥ प्र
सूनबाणः कामः आदिर्मोमुख्योपस्य सचासौ दूषणव्रजो दोषसमूहस्तम् नीरदो मेघः वारिणा मेघपुष्पे
णा आपस्तोयं घनरस पयः पुष्करं मेघपुष्पं कं पानीयं सलीलमुदकं वारि वाः कुंबरं च॥ अर्णः पाथः कुत्राज

श्रितान्व्य कुर्वन्निव वित्तसंपदो विविक्तबोधस्य कृतनिर्मलात्मनः॥ निधीनुदंतान पिसं ततन्त्वयेतन्नूधरक्षेमविधि
क्ष्मयाक्षयान्॥१८॥ लवणक्षीरमंभोंबुनीरं श्रीलंकं प्राज्ञैर्भुर्वनममृतं जीवनीयं दकं चेति हलायुधः उग्रदावंतीव
ज्ञावान लंयथा तथा वयुनेन ज्ञानेन॥ मायावयुनं ज्ञानमिति निघंटुः॥ क्ष्मत्रामस्तत्तम्॥ निर्वापयति स्मनिवर्ल्प
यामास ज्ञामयामासेत्यर्थः उपमालंकारः॥१७॥ श्रितानीति स्फनिर्मलो विविक्तः आत्मा स्वभावोपेयातान्॥
आत्मा पुंसि स्वभावेऽपि प्रयत्नमनसो रपि धृताव पिमनीषायां शरीरब्रह्मणो रपीति मेदिनी श्रितान् कृतस्वा
श्रयान्॥ उदंतान्साधून उदंतः साधुवार्त्तयोरिति विश्वमेदिनौ तनूनां देहानां धराधारकास्तनूधरा देहिनः॥ ॥१७॥

कायो देहः क्लीबपुंसोः स्त्रियां मूर्तिस्तनुस्तनूरित्यमरः तेषां क्षेमं शुभं मोक्ष इतियावत्॥ क्षेमोऽस्त्री लब्धरक्षणे
चंडायां नाशुभेनस्त्रीति मेदिनी॥ तस्य विधिस्या विधातुमिच्छा कर्तुमेच्छेतियावत् विपूर्वात्सनंताद्धातेः स निमिमे
सादिनाइस् अत्र लोपोऽभ्यासस्येत्यभ्यासलोपः ततः स्त्रियामप्रत्ययादितिभावे अकारः ततष्टाप् तया हेतुभूतया वि
त्तस्य धनस्य संपद्भूतिस्तस्याः द्रव्यं वित्तं स्वापतेयं रिक्थमृक्थं धनं वसु हिरण्यं द्रविणं द्युम्नमर्थरैविभावा अपि सम
ृद्धः संपद्भूतौ गुणोत्कर्षे हारभेदेऽपि च स्त्रियामिति मेदिनी॥ धनराशेरिव॥ विविक्तः पवित्रः शुद्ध इत्यर्थः विविक्तोऽप्

विभिन्नसेतूनसतो गुरून् क्षितौ मदानुपस्थ्का निव दंतिनो कुतोः॥ कृतुर्ग्रहानान्नमदापतापतो भृत्रां निगृह्णन्नि
हसज्जनप्रियः॥१९॥ तविज्ञ नाविग्रमरः॥ स चासौ बोधो ज्ञानं तस्य विशुद्धात्मपरमात्मस्वरूपज्ञानस्येत्यर्थः सं
तत्वस्येदानभोगाभ्यां निरंतरोपयोगेऽपि॥ आनंसानंतगुणाभ्यामिति भावः अक्षयान् निधीन् प्रकुर्वन् अत्रत्रा
तूमात्रसाधर्म्यात्सकृतापकृतविषयः श्लेषतस्थ्याविती उपमयो रंगीभावेन संकरः॥१८॥ विभिन्नेति विभिन्ना
विच्छिन्नाः सेतवआलयो येस्तथा भूतान्॥ धर्मध्वजित्वादधर्मपंचनास्वाप्रवीणत्वाच्च धर्मदर्शने पूर्वजनवंचने
नामूलो छेदित धर्ममर्यादानित्यर्थः सेतुर्नालो कुमारक इति मेदिनी मदेन सर्वजनी करणगर्वेणाहर्षेणवा

हरिसं. अनुपरक्तामाप्तास्तान्मदो रेतसि कस्तूर्यां गवे हर्षे भदानयोरिति मेदिनी ॥ अत एव रक्तकुर्ग्रहान् अमैः सुतरां सर्ग.१
॥१८॥ दुःखेनापि गदितुमशक्यान् ॥ हस्त्यर्थे कल्ल चक्रादिन्यासधारकयन्मं रलदन्तीं नेन नृपादयो ऽपि कृतापराधा
नपि यानुपादातुं भयं येभ्यः प्राप्नुवंति तथाभूतानिसर्थः क्षितौ वर्त्तमानानिति निर्दोषः असतो ऽसाधूनतिदुष्टा
निसर्थः गुरुलक्षणवतारदेशिकान् ॥ आत्मनः स्वस्य मदानतिमन्मदेवत्वाच्छुद्धोयः प्रतापस्तेनेतितितः ॥ अं
कुशैः सृणिभिः अंकुशास्तु सृणिः स्त्रियामिसमरः दंतिनः करिण इव दंती दंतावलो हस्ती द्विरदोनेकपो द्विपः
अविक्रियः प्राकृतसर्वत्रार्मस्कस्मराशिराक्रान्ता इवेव मारुतः ॥ क्षिताववष्टंभ इवोर्ववाडवः सदैव निर्बंधतयाप्य
वस्थितः ॥२७॥ मतंगजो गजो नागः कुंजरो वारणः करी समरः निगृह्णन्निग्रहं कुर्वन् ॥ सत्तनाः प्रियायस्य स
तानुरिरक्षिषुरितिभावः पूर्ववदेवालंकारः ॥२५॥ अविक्रिय इति आक्रान्तो विहायः तेषाक्रान्तो विहायो ऽस्त्री
ति हेमः सद्रुवमारुतो वायुरिव अवष्टंभः स्ववर्णमिव ॥ अवष्टंभः स्ववर्णे च स्तंभप्रारंभयोरपीति मेदिनी ॥ यथा
स्ववर्णं भूमौ निहितमपि निक्षिप्यते न च विक्रियते प्रसुत वर्द्धते न तथाम धातवः यतस्तेतथा त्वंगमितास्तत्साम्य
प यां समेमुक्ता अपितथैव विषसंगेन बंधनं यांति स्वयंतु न तथेतिभावः ऊर्वस्य मुनेरपत्यमौर्वः विद्याद्यञ्जु ॥ व ॥२८॥

त्लेयजनोश्चेति कुर्वाद् इति मुकुंदः तन्नेति त्वात्स्वार्थकधाकारः अनंतरापत्ये ऽप्लो ऽसंभवात् तस्मादृष्यंधके
सण ॥ वडवायां भवो वाडवः ॥ तत्र भव इत्यण् स चासौ मवौर्वाग्निश्च ॥ यथौर्वाग्निर्नीरधावस्थितो ऽपि तज्ज
लैः पराभवमगच्छन्प्रसुत तत्स्थानेन मूर्छे तेतान्यपि स्वात्कृत्तान्यतितथा स्वयमपि सदूषणान्दुर्जनान्विमली कु
र्वन्स्वयमतद्दोषदूषित एवास्ते इतिभावः ॥ प्राकृतानि पृथग्जनितिज्ञातानि यानि सर्वत्राप्नोति सकलनृपाक्षितिष
योपभोगस्कस्वानितेषु ॥ नीचप्राकृतः पृथग्जनस्वरमिति हलायुधः ॥ अवस्थितो ऽपि नृनार्यानुकरणेप्रदत्तो ऽपि ॥
नारीरभाज्जो वचसातिवीर्यतोद्गरं तमापस दमस्तताभवम् ॥ कमेषजेन प्राणयन्नारीयसाम महागुणेनेवभित्व घ
रोरुजम् ॥२९॥ सदा सर्वकालम् ॥ निर्बंधतया हेतुना अविक्रियो निर्विकारः एभिराकान्ताद्युपमाने रसंगित्व
निर्दोषत्वानिर्विकारित्वाद्धृष्यत्वानि विवक्षितानि मालोपमेयम् ॥२८॥ नारीरेति असति नार्यितं वीर्यं साम
र्थ्यं यस्य तेनेति ततः एकत्रस्वाश्रितजनानाम निवार्यकामादि महान्तरंगदनिवर्त्तनक्षमेण ॥ अमत्रराजय
क्ष्मादन निवार्यरोगमात्र निवर्त्तनसामर्थ्येन वीर्यंशुक्रे प्रभावेपितेजः सामर्थ्ययोरपीति विश्वः महान्प्रचुरः
गुणः एकत्र स्वाश्रितानामासंतिकमोक्षप्रापणरूपो ऽन्यत्रारोग्यतापादनरूपो येन तेन गरीयसा एकत्र पारमे

हरिसं· श्रीर्यस्यास्तां ब्रह्मादिभिरप्यनतिक्रमणीयेन अमन्दमाहात्म्येनेत्यपि वक्तृसामर्थ्ययुक्तत्वाद्वक्तृगुणकर्तृत्वाच्च सर्ग·१
॥१९॥ गुरुतरेण वचसा स्वाश्रितहितकारकेण वाक्येन। भिषग्वरो वैद्यश्रेष्ठः आयुर्वेदी भिषग्वैद्यौ दोषज्ञः स्याच्चिकि
त्सक इति हलायुधः। अभेषजेन सदौषधेन भेषजमभेषजं तेनागुरगदस्तन्त्रमौषधमिति हलायुधः। रुजं रोगमि
व रोगो रुजा रुगातंको मान्द्यं व्याधिरपाटवम्। आमः आमयः आकल्यमुपतापोगदः समाः इति हैमः। शरीर
भाजां स्वाश्रितदेहिनाम्। दुरन्तं दुरवसानम्। आपसदं विपत्तिस्थानम्। विपत्तिरपि यातनापदो रिति मेदिनी

अदभ्रधीभेदतमस्तिरोहिते मुमुक्षतां भक्तिविधाविवागमः। भृशं विशुद्धः कृततोऽतिदुर्गमं विधापयन् दी
पवदार्थदर्शनम्॥३२॥
भवं तं संसारं जन्म स्वाभवः क्षेमेन्द्रा संसारे सत्यायां प्राप्तिजन्मनोरिति मेदिनी। अस्तनतां ना
शमुपगणयन् प्रापयन्। श्लेषानुप्राणितोपमालंकारः॥३१॥ अदभ्रेति धियो मनसः भेदः स्वस्वासंतिकनिःश्रे
यसरूपकार्यविपत्तिपत्तिस्तमोंधकारः इत्येसुपमितसमासः। आगमः इव दीपः इति चोपमानध्यानुसारा
त्। अदभ्रं प्रभूतं यन्मतिभेदतमस्तेन तिरोहितानाविद्यमानोऽपि ध्वान्तापहतदर्शिनां पदार्थ इव छन्नस्तस्मिन्
प्रभूतं प्रचुरं प्राज्यमदभ्रं बहुलं बहु रिस्यमरः। भक्तिविधौ श्रवणादि नवप्रकारभक्तिविधाने तस्मिन्। विधि ॥१९॥

र्नानियतौ काले विधाने परमेष्ठिनीति मेदिनी भृशं नाम संततम्। विशुद्धः परम्परागतत्वात्संप्रदायशुद्धः
अमन्दतैलवर्त्यादिप्रवातादिदोषवर्जितत्वाद्विशुद्धः प्रकाशः। कृततः स्वभ्यस्तः अमन्दश्चाय वर्त्मिमषी ग्रंथि
च्छेदनादिनास्कविहितः आगमः शास्त्रमपि च आगमः शास्त्रमागमे इति मेदिनी दीपः प्रदीप इव कज्जलध्व
जः स्नेहप्रियो गृहमणिर्दशाकर्षी दशेंधनः दीपोऽस्त्रियां प्रदीपोऽस्त्रीति हैमः मुमुक्षुतामनाद्यज्ञानाधकार
[illegible] निवृत्तिपूर्वकं संसारादात्मानं मोक्तुमिच्छताम्। अर्थदर्शनं कर्त्तव्यार्थज्ञानमन्यत्र यथावस्थितार्थस्वरूपज्ञा॰

अघव्रजोच्छेदविधौ पटीयसी क्षपाकरो भक्तिमिवौषधिं प्रभुः। क्षितौ पपुत्रस्मन्निह दैवसंपदे नयन्प्रकाशं चकु
मुद्वतीहरिः॥३३॥ नम् विधापयन् संपादयन् भृशम् विशुद्धः कृशाभनानिष्कृतानितनो ह्रस्वहेतुभूतानि कर्मा
णियस्य स तथोक्तः अलंकारस्तु मालोपमाख्य एव॥३४॥ अघेति इह अस्मिन् लोके क्षितौ पृथिव्याम् क्षिति
रिलाक्षोणी क्ष्मा क्ष्मा चला कुः पृथ्वी पृथिवीति हलायुधः। अघानां पापानां व्रजः समूहः पापं किल्बिष
कल्मषम्। कलुषं वृजिनैनोघमित्यमरः व्रजो गोष्ठाध्ववृन्देष्विति विश्वमेदिन्यौ। तस्य विच्छेदविधिर्विध्वंस वि
धानं नाशकरणमिति यावत्। तत्र पटीयसी अतिशयेन पटुः सर्वथा दक्षे सर्थः पटुशब्दादियसुन् ततस्त्रि

तद्येतिडीपृ ताम् पटुस्तीक्ष्णोस्फुटेदक्षेनिष्ठुरेनिर्दये॰ पिचेतिरुद्रः भक्तिंस्वकीयसन्नेमनवधासेवनरूपाम् ॥ भ
क्तिर्विभागेसेवायामिति विश्वः प्रथुदमन्नत्तिन्यायेनपुष्टतांप्रापयन् ॥ दैवसंपदं धर्मज्ञानवैराग्यादिरूपांश्रीम
न्नगवद्गीतोक्तांदैवसंपतिम् ॥ प्रकाशांप्रफुल्लतांम् नयन्प्रापयन् अतएवप्रभुर्भक्तिरूपदैवसंपद्रक्षणसम
र्थः हरिः ओषधिंफलपाकांताम् ॥ ओषधिःफलपाकांताओषध्योत्ताविमात्रेस्मुरितिचामरः ॥ प्रपुष्यन्
कुमुद्वतीव कुमुदान्यत्रदेशेसंतीतितांकुमुदिनीम् कुमुदनडवेतसेभ्योड्मतुप् कयइतिवत्वम् ॥ कुमुद्वती ॥

महीतलंतद्यशसासितीकृतंदुतंचगंगामवलोक्यलीलया ॥ प्रियांमहोक्षंप्रियमुत्तमंहरोगिरिंसमारोप्यरु
रोहविस्मितः ॥२४॥ कुमुद्विमामिस्यमरः प्रकाशंनयन् क्षपाकरओषधीनांइव ओषधीशोनिशापतिः अ
ब्जोजैवात्रकः सोमोग्लौर्मृगांकः कलानिधिः द्विजराजः शशधरोनक्षत्रेशः क्षपाकरइत्यमरः ॥ अ ॥ संप्रतिश्री
हरियशोवर्णयितुः कविर्युग्मेनाह महीति असितंसितंकृतमितिसितीकृतंतनयश्रीहरेर्यशः कीर्तिस्तेन
सितीकृतंशुभ्रीकृतम् ॥ यश्वहयशःसितांकीर्तिसमकीर्तिरिततोऽन्यथेतिवाग्भट्टोक्तेर्महाकवयः कीर्तिपर्या
यंयशःशुक्लंवर्णयंत्यतस्तेनसितीकरणंयुक्तमेव ॥ महीतलंभूमंडलंभूगोलमितियावत् अवलोक्यसंवी ॥२०॥

क्ष्यहरः शिवः लीलयाविलासेन लीलांविद्धः केलिविलासखेलशृंगारभावप्रभवक्रियास्वितिविश्वः ॥ प्रि
यांपार्वतीम् गंगांभागीरथींच यद्वाप्रियामितिगंगाविशेषणंतज्जलस्यशुभ्रत्ववर्णनोपपत्तिकत्वात् ॥ उत्त
मम् उत्कृष्टंश्रेष्ठमित्यर्थः उत्कृष्टेचोत्तमोऽनुवदितिविश्वः महाश्चासावुक्षाचवृषभोमहोक्षोभमहावृषस्त
म् अचतुरेत्यादिनासाधुः उक्षाभद्रोबलीवर्दऋषभोवृषभइत्यमरः समारोप्यारोहयित्वाद्रुतंशीघ्रमेव तवोःस्य
शीघ्रंत्वरितंलघुक्षिप्रमरंद्रुतम् सत्वरंचपलंतूर्णमविलंबितमाशुचेत्यमरः गिरिंकैलासम् हिमाचलस्यकै

लासाचिनीतःप्रथितेनयांद्रुतांगतेनतेनाप्रतिवार्यतामरम् ॥ प्रियोक्षगंगाजगतीधरान्वितस्ततश्चप्रभुसापत
पश्चिकव्रतम् ॥२५॥ लासारब्धस्तिरस्कृतंनलिलाम्नतस्यंतस्यहिमकृतशुभ्रत्वाभावात्विस्मितः अहोस्वभाव
सितस्यापिममशितिसितताकारकमिदंकिमित्याश्चर्यांविष्टःसन्नित्यर्थः रुरोहारोहतिस्म ॥२४॥ तथापीति
तितथापिहरेणकैलासारोहणेकृतेऽपिप्रथितेनविश्रुतेन अरंशीघ्रगतिना अरंशीघ्रेवचक्रांगेशीघ्रे
पुनरस्मत्रवदितिविश्वः अतएव अप्रतिवार्यतांगंगांबुवदनिरोध्यताम् गतेनप्राप्तेनतेनपूर्वोक्तेनयशसा
उक्षांनंदिकेश्वराख्यबलीवर्दश्चगंगाभागीरथीचजगतीधरः कैलासश्चप्रियाःस्वस्त्रीतिद्वंद्वस्तैर्येगंगा

दयश्चतैरन्वितो युक्तः हरः पांडुतां स्वतनोप्यतिशायितशुभ्रतां नीतः प्रापितः सन् पांडुः कुंतीपतौ सिते इत्स
नेकार्थसंग्रहे हैमः तदाप्रभृतिस्वस्यातिपांडुतापादनदिनमारभ्य तपस्यत्नुकंपार्हस्तस्य कृतं ध्यानाचर
णादिलक्षणं व्रतं भजनव्रतम् तपस्वी तापसे चानुकंपार्हे चेति विश्वः प्राप्तवान् कथा श्वेतजलां गंगां त्रि
श्वेतो वृषः कर्पूरगौरस्थाहं तथाविधोऽयमगाश्वेसे तेयदेतेन पांडुत्वं तास्तदाम्यतः सिद्धमस्मा कं शुभ्रत्वमकिं
चित्करमेवातस्तपश्चरणमेव श्रेयइति मत्वायथा कस्यचतानुकंपास्त्वस्मिन्मादेवं भूतं व्रतमाश्रितो हरो वभृ

यत्रोविधुस्तस्य कलाक्षयोज्झितो निपीयमानो विबुधैरनारतम् ॥ प्रबोधयत्युत्तमवासनान्वितं दिने दिने सज्ज
नकैरवाकरम् ॥२६॥ वेसर्थः स्वतः शुभ्राणामुक्षादीनां यत्नतः शुभ्रीकरणोक्त्यानुगुणालंकारः स्वतः कैला
सस्थस्य हरस्य तद्वत्रोऽप्राप्यवलोकनपलायनोक्त्याऽहेतो हेतुकथनरूपा चोदोक्तिस्वस्वतस्तपोनिष्ठस्य त
स्वभृतितपोनिष्ठत्वोक्त्या विभावनाचेति त्रयाणां संकर ॥२५॥ यत्रादिति तस्य हरेः यत्रो विधुर्यत्राश्चंद्रः विबुधैः
पंडितैर्देवैरिति विश्वः स्त्यकम् ॥ अनारतमजस्रम् सततेनारतात्रांतसंततविरतानिशम् निसानवरताज
स्त्रमिति स्वर्वर्गः मरः निपीयमानोऽतिशायेन कृतकलापानोपि पीडुः पानेः स्मात्कर्मतिन्नाज्ञानच् कलानां षोड ॥२१॥

त्रांतत्रानामुक्षयोः पक्षयस्तेनोज्झितो रहितः सन् कलाप्यान्मूलरेखाद्धो वृद्धिमाद्यावंत्रामात्र केषोडशांत्रो च चंद्र
स्य कलना कालमानयोरिति मेदिनी दिने दिने प्रतिदिनम् उत्तमा जननिर्वाणविधित्वारूपत्वाकुलरूपायावास
नातया ऽन्वितं युक्तम् सज्जनाः साधुजना एव कैरवाणि कुमुदानि तेषामाकरः समूहस्तम् कैरवं कुमुदे शोक्त मि
ति विश्वः प्रबोधयति विकासं नयति चंद्रस्य विबुधकृतपानलेकामंदः ॥ धर्मार्थे क्षीणकोत्राप्यक्षीणत्वमविज्ञा
भने स्फुरेः पीतावस्रोऽयस्य हृष्यपक्षविधौ श्वेतिक्त्यत्र निरंतरं देवकृतकलापानवर्णनरूप युक्तकलाक्षयहे

मरालमालाभिरलं भिनत्त्यधुना किमंभसा कैरवयोगमीयुषा ॥ नदुत्रते स्तस्य सदर्जुनीयसः सितत्वले शोयवाशो हि
मादिणा ॥२७॥ तुकारणे सरपिकलाक्षयोज्झितत्वरूपकार्यावत्र निवर्णनदर्शनाद्विशेषोक्तिरलंकारः ॥२६॥ सं
प्रति कलक्षत्वपराकाष्ठाभूतानुत्रांभ्वादीनिविशेषयतस्तेभ्योऽप्यतिप्रचुरस्मितं हरियन्नाश्चसं वीक्ष्यो सेक्षने मरालेति
तस्य हरेः सदर्जुनं निष्कलंकत्वात्प्रसस्तधवलम् अतिशयेन सदर्जुनमिति सदर्जुनीयस्तस्य स्वस्यातिशायसिते सर्थः
यन्नासः कीर्तेः सितत्वलेनापि श्वेतभावाणुः मरालमालाभिर्हंसपंक्तिभिः हंसो मराल चक्रांगो हंसास्तु श्वेतगरु
तश्चसमरधनंजयो अलं भिप्राप्तोऽस्ति किमुक्तमम यथा ते श्वेता इति भावः त्रांधुना कर्पूरगौरतया वर्णितेन त्रि

वेनापिसोऽलंभिकिम् कथमममथासकर्पूरगौरइतिभावः॥ कर्पूरगौरंकरुणावतारमितिनिर्विवर्णनात्॥ कैर
वाणिकुमुदानिश्वेतपद्मानिवातेषांतैर्वायोगः संबंधस्तम् ईयुषाधिगच्छताअंभसातेनापिसोऽलंभिकिम्
कथमममथातानिश्वेतानीतिभावः सितेकुमुदकैरवेइत्यमरः उडूनिनक्षत्राणितेषांव्रजाः समूहास्तैरपिसोऽलं
भिकिम् कथमममथाताअविधवलानीतिभावः नक्षत्रमृक्षंभंतारातारकाप्युडुवास्त्रियामित्यमरः॥ हिमाद्रि
णाहिमाचलेनापिसोऽलंभिकिम् कथमममथासवलक्षइतिभावः यद्वृत्तासोऽसंतश्चेत्सदर्शनेनमरालमालादि

गुंफितानिमहनीयतद्दत्तोमौक्तिकानिगुणविद्रुमैः सह॥ मरालतेकलमरालसमक्षेचारुकंठिनिनितदीयमालि
का॥२८॥
धुतकुत्सेक्षणाकुत्सेक्षालंकारः शुक्लशुभ्रशुचिश्वेतविशदश्येतपांडुराः अवदातः सितोगौरोवल
क्षोधवलोऽर्जुनइत्यमरः॥२९॥ संप्रसेकेनपद्येनतद्दन्तोमालातापैणवर्णयति गुंफितानीति तस्महरेर्यन्त्रा
स्तद्दत्ताः महनीयंपूजनीयंयत्तद्दन्तास्तदेवमौक्तिकानिमुक्ताफलानिगुणान्सपारकारुणप्रभृत्यत्वादय
स्तएवविद्रुमाः प्रवालानितैः पद्मरागोथमौक्तिकम् मुक्ताथविद्रुमः पुंसिप्रवालंपुनपुंसकमित्यमरः सहसा
कम् साकंसार्द्धंसमंसहेत्यमरः गुंफितानिग्रथितानिआसन्॥ ग्रथितंगुंफितंदृब्धंसितेषुसमास्तिति ॥२३॥

वैधम्यपर्यायोविश्वः॥ युक्तौ ग्रंथनेग्रंथनेगुंफइतिहलायुधात् गुंफोग्रंथनंसंजातोयेषांतानि॥ इतनानीतितदा
श्लेषोबोध्यः तेषामियंतदीयातद्धस्त्यादादीनिचेतिनिर्वृत्तात्छाच्छइतितमर्थेछस्तस्यायनेयीनीयियइत्या
दिनादयादेशः सचासौमालिकाचेतिकर्मधारयः चारुः श्रव्यत्वाद्रमणीयोयः कंठोध्वनिः सविद्यतेऽस्येतितस्ति
स्मिन् कंठोगलेसन्निधानेध्वनौमदनपादपेइतिविश्वः कलौमधुरस्वरौयोमरालोहंसः परमहंसपर्यायोभगव
देकांतिकान्कइत्यर्थः तस्यसन्श्रेष्ठोगलः कंठस्तस्मिन्कमस्वरेभागवतसाधुकंचेत्यर्थः॥ मरालनेत्राभतेकल

तदाश्रिताभीष्टदतांकरालयेनिरामगीतांकमनांव्रजेमुदा॥ विनम्रतांसस्तरवः प्रपेदिरेलसंसलन्तंक्षितिरुद्र
ताः परे॥२९॥
शुक्रेकलोजीर्णेऽव्यक्तेचमधुरध्वनाविति विश्वः॥ कंठोमुनौस्वररुचांभेदेनसारिविदिनोः कंठेध्वनौक
निध्वानेग्रीवायांमदनद्रुमेइसनेकार्थसंग्रहेहेमः तेहितस्यनृगोगुणगणांश्चाजस्रेगायंतीतिभावः रूपकमलं
कारः रथोद्धतानान्नमृरान्नराविरहथोद्धतालगाविति लक्षणात्॥२८॥ संप्रतितस्यभक्तमनोरथसंपादनी
यतामाह॥ तदेतिकरालयेस्वर्गेकमनोव्रजेर्देवदंदेः कमनाः पुष्पमालसोक्रिदशोकोविदेःपिचेतिविश्वः मु
दासानंदेनगीतांमुकुर्मुकुः हृतगानाम्॥ अभीष्टंवांछितंददातीतितथोक्तः आतोनुपसर्गेकइतिकः आ

तोलोपश्चात्तस्याभावोभीष्टदतान्याश्रितानां कृतस्तन्नारणानामभीष्टप्रदता नस्यहरेर्याश्रितामीष्टदतातताम् स्वा
श्रितजनसकलवांछितफलप्रदातृतामित्यर्थः निन्नाम्यन्मुलास्वस्तरवः स्वर्गस्थिताः कल्पवृक्षाः नम्रतांमन्न्
रितादवाञ्छुखतामुप्रपेदिरेलेभिरे गतकल्पवृक्षत्वाभिमानावभूवुरित्यर्थः कामपूरकेभ्योऽस्मत्तोप्ययमधि
कः कश्चनजातोतो हृतयन्नास्मांनः किमूर्ध्वावलोकनेनेतिनम्रवदना बभूवुरितिभावः परेतेऽभ्योमेक्षितिरु
द्वत्ता महीरुहसमूहाः त्वसंतित्यग्रनम्रत्वेन वर्त्तमानाः संतः शोभतेयत्तत् अवलंत्तं निर्लज्जत्वं यथास्यान्तथैव

तदीयरम्यांघ्रिपयोजतनुर्द्वयं विलोलसज्जन्कमनोलिमालितम् ॥ बिभर्त्तिमूर्ध्ना जनतातदाश्रितापरिस्फुरच्छोण
नखांशुकेसरम् ॥ २०॥
त्वसंतियथागतलज्जाः पिकश्चित्वयन्नासिगतेः पिनिः न्नांकमुकुहास्तानतोभ्रमन्त्वित्यस्
तितथानेपीमर्थः स्वस्तरूणांलज्जाप्राप्स्युक्तारातत्ज्जक्राभीष्टप्रदत्वस्यातिक्रमतरूलोक्त्वाचाधिक्यवर्णनादस्तु
क्तिरलंकारः कल्पद्रुमाणांकेश्चिदपिनम्रत्वं नकारितंकेवलमनेनेवेसमर्थ कथने विशेषभेदश्चसंबंधानित्रायो
क्तिश्चापि ॥२०॥ इदानीं श्रीहरेर्भक्तानां प्रणयोद्रेकं ताम्माह ॥ तदीयेतितदीयेश्रीहरिसंबंधिनीपरम्येजांघ्रिप
योजतनुषीचरणावंकजेतयोर्द्वयं युगलम् ननुपंकजंतु द्विरेफमालाशोभानतीस्यानामत्रतत्संबंधाद्दर्शनात्क ॥२३॥

थंतस्यदयोरंबुजोपमानत्वमित्यसान्नांकायांतद्विशेषयति ॥ संलस्द्रूते भक्तास्वसज्जन्काभगवदेकांतिकभक्ताः सा
धुजनास्तेषांमनांसिमानसामेवव्याजलयोर्भृंगाः ॥ विलोलास्तस्मिन्विशेषतः सत्तृष्णापेसज्जन्कमनो ऽलयस्तेर्मा
लितमतिराजमानम् ॥ मधुव्रतोमधुकरोमधुलिण्मधुपालिनः द्विरेफपुष्पलिड्भृंगषट्पदभ्रमरालयः इत्यमरः
जोलः स्याद्वाच्यलिंगकः सत्तृष्णेचचलेइतिमेदिनीयद्वा ॥ सज्जन्कमनोलीनामालीश्रेणिः संतातान्यत्रेतितथाभूत
म् ॥ ज्ञातार्थेइतच ॥ ननुतत्रतुकेसराः संतित्यत्रतुतदभावात्कथंपद्मत्वमित्यत्राह परिस्फुरंतश्चंचंतोयेन्नेशोणनखा

विधायकासारजनुस्त्वपस्थिरंजगामयस्यांभसिनापितुल्यताम् ॥ उपेसतसादमयोजनुर्जनाहसंततिहंसानिवहंस
तांगताः ॥२१॥
नांस्कनखरागमंनावीरत्नमयस्तएवकेसरायस्यतत् ॥ केसरोनागकेसरे तुरंगसिंहयोः स्कंधके
शेषुवकुलद्रुमे ऽपुन्नागवृक्षेकिंजल्केइतिहैमः एवं विशेषणविशिष्टम् तत्तदीयरम्यांघ्रिपयोजतनुर्द्वयम् तदा
श्रिताद्भुततदेकाश्रयाजनताजनसमूहः मूर्ध्नाशिरसाबिभर्त्तिदधातिरूपमाभेदोलंकारः ॥२१॥ विधायेतिका
सारेसरसिजनुर्जन्मयस्यतत् कासारः सरसीसरइत्यमरः जनुर्जननजन्मानीतिचयद्यपिकासारजत्वंधिमच्छक
च्छपादीनिवहूनिसंतितथापितेषामनुपयोगासंकजमरेणादिवदत्रयोगरूढ़ाकमलंज्ञेयम् अंभसिन्नं

चुनि । अंभोर्णस्तोयपानीयनीरक्षीरांबुशंबरमित्यमरः । चिरं दीर्घकालम् । चिराय चिररात्राय दीर्घकाले प्र
युक्तं । चिरं चिराच्चिरेणेति हलायुधः । तयोः अज्जलावामहत्त्वरूपम् विधाय कृत्वापि । यस्य श्रीहरिपादपयो
जन्मुषः तुल्यतां गुणादिभिः साम्यम् नजगाम न धनिनोद्दृष्टिं दृष्टवनेव प्राप्तवान् इत्थंभूतमिति शेषः तस्य श्रीहरे
र्यत्सादपयोजनुषश्चरणकमलं तत् । उपेसात्मनुरागेण संगता जनाः हंसतां परमहंसभावम् । यद्वा हंसो यथा
नीरक्षीरविभागं करोतीति तथात्मानात्मनोः सदसद्विभागकर्तृत्वम् हंसवत्त्वं गताः प्राप्ताः संतः हंसा

प्रतापतो यस्य जनादिलीतले द्रुतं पलायंत इहातिभीरवः । असन्निसर्गाद्रवरंकवो हरेर्महाक्रूरा द्विरदा वदा
रिणः ॥ २३ ॥
मानसरोवरो सन्नपद्मकोन्नावस्थितश्वेतगरुत्सक्षितिं शेषान् हंसं तीन् इत्युत्प्रेक्षा भवद्भिर्यन्नीर
जं प्राप्तं तलपाथिवादन्यक्रसत्प्रदं यदस्माभिरुपलब्धं तत्तु निरवधिकातिन्नायसर्वोत्कृष्टदिव्यत्वात्मेव प्रदमाश्र
यमात्रेण प्रास्यज्ञानादिगुणोत्सारकमतस्तत्साप्तानां तत्स्वभाववैरादूषणानां नः पुरतो भवतां किय द्विन्नाद
त्वमस्ती सुप हसंतीवेतिभावः ॥ २४ ॥ अथैतत्प्रतापवर्णनं प्रक्रमते यावत्सर्गसमाप्ति प्रताप इति महांतो ब
लादिगर्विताश्चतेक्रूरादयो दानवाश्चतएव द्विरदादंतिनस्तान वदारयंति प्रारयंतीति तदसदंती दंतावलो हस्ती ॥२४॥

द्विरदोऽनेकपो द्विपइत्यमरः पक्षे महाक्रूरा यक्षवा तिवलिनो ये द्विरदास्तद्वदारिणः यस्य हरेर्नारायणस्य
प्रतापतः प्रभावातिन्नायात् पंचम्यास्तसिल् इहास्मिन् दिलीतले भूतले दिली मही क्षमा पृथ्वी पृथिवी ला
धरावनिरितिनामलिंगाकोशः । अथ स्वरूपयोरस्त्रीतन्त्रमित्यमरः अतिभीरवो ऽसान्ताः भीरुरान्तेत्रिलिंगः
स्यादितिमेदिनी महाभयभीता इत्यर्थः असन्नसाधुर्निसर्गः स्वभावो येषां ते ऽतिपापरूपस्वभावा इत्यर्थः ज
नालोकाः हरेः सिंहात् सिंहो मृगेंद्रः पंचास्यो हर्यक्षः केसरी हरिरित्यमरः रंकवो मृगभेदाः रुरुर्न्यसाररुरु

प्रुतिर्यदीयाप्रणुदंहरसां द्रुतं नृणां रभाजां हृदयस्थितं मलम् । निहंति गंगा तटिनीवरीयसी कवेचरावासम
दृश्यसेवया ॥ २३ ॥
कुंभीरवरसो हिंसाइत्यमरः ते इव द्रुतं नृणां घ्रम् अथ द्रुतं त्रिषु द्राग्इतिमेदिनी पलायंतेप
सर्पेति परापूर्वादयतेः कर्त्तरि लट् । उपमालंकारः । कंबीश्वहरिप्रतापयोरुपमानोपमेययोर्वाचकस्ये
वन्नाङ्घस्यद्रुतपलायनरूपसाधारणधर्मस्येवं चतुर्णामुपनिबंधनात्मा पूर्णैव वा अभइस्कउपमानेनसाह
श्यमुपमयस्ययत्रसाप्रसयाभयतुल्यार्थसमासे रूपमामतेति साधारणधर्म मनुद्वाप्युपमामाहारूप
कस्यतस्याश्चसंसृष्टिः । २२ । अथ जगसावमागंगायाः सकावृगद्वियश्चार्थेभगवस्ततापाधिक्यमाह

श्रुतिरिति॥ अंहः सो कल्मषाणाम् अघद्वीपं कलुषमामपाप्मपापं किल्बिषं कल्मषम् कलुषं वृजिनैनोघमंहो
दुरितदुष्कृतमित्यमरः प्रकर्षेणनुदतीतिप्रणुत् क्विनान्नाकर्त्री प्रपूर्वान्नुदतेः क्विप्॥ यस्य प्रतापस्येयंयदीया
यस्य प्रतापसंबंधिनीत्यर्थः यदीयेतितदीयन्नाद्वन्वस्यसुयविधिः॥ श्रुतिः श्रवणम् कृतिः श्रोत्रेचतत्कर्मणपाम्ना
यवार्त्तयोः स्त्रियामितिमेदिनी नारीणांतिगात्राणिभजंतीतिनारीर्भाजो देहिनस्तेषाम्॥ क्विप् अथकलेवरं
गात्रंवपुः संहननंशरीरमित्यमरः हृदयस्थितमंतःकरणेएकात्मभावेनावस्थानादहृद्यपनयातत्रकृतावास
म्॥ स्वांतमास्वनितंचित्तंचेतोंतःकरणेमनः॥ हृदयमितिधनंजयः मलंपापम्॥ मलोऽस्त्रीपापविट्किट्टेष्वप
लोत्वमिधेयवदितिमेदिनी दुतंनाशघ्रम्॥ निहंतिविनाशयति॥ अतिशायेनवरांवरीयसी द्विवचनविभंसेसादि
नापकर्षार्थेईयसुन्नगितश्चेतिङीप् तटिनीषुनदीषुवरीयसीतिश्रेष्ठा॥ अथनदीसरित्॥ तरंगिणीशैवलि
नीतटिनीत्यमरः॥ गंगाविष्णुपदी॥ गंगाविष्णुपदीत्यमरः अहश्चसेवयावकल्कालंप्रचुरपरिश्रमिलनेनेत्यर्थः
कलेवरेदेहेआवासःस्थितिर्यस्यतम् केवलंदेहएवावस्थितमित्यर्थः॥ निहंतिताहरंशमलंनिवारयतिनतु
चित्तस्थमितिभावः॥ अत्रप्रतापश्रुतिस्फुरद्गंगयोरुपमेयोपमानयोर्मध्येउपमेयप्रतापश्रुतेराधिक्योक्तेर्व्य
तिरेकालंकारः केनचिद्व्यत्रधर्मेणद्वयोःसंसिद्धिसाम्ययोः॥ भवसेकतराधिक्यंव्यतिरेकःसउच्यतेइतिवाग्भ ॥२५॥

ट्टोक्तेः तथाचोक्तंश्रीमद्भागवते॥ यत्संगलब्धंनिजवीर्यवैभवंतीर्थंमुहुःसंस्पृशतांहिमानसम्॥ हरसजोंतःश्रु
तिभिर्गतोंगजंकोवैनसेवेतमुकुंदविक्रममिति॥ २४॥ उदीरयंतमिति इहसंसारेस्वाश्रयमात्रेणानेकजनसंसृति
मोचकत्वंस्वानेकविधैश्वर्याणांस्वसाधुषुप्रदर्शकत्वंस्वेक्षणमात्रेणासंख्यजीवानांसमाधौगोलोकादिधामवी
क्षणप्रदत्वंस्वप्रेषितेनसमाधिमताभक्तेनसमाधौगोलोकादिवीक्षमाणस्वभक्ताह्वानविधानमेवमाद्यनेक
प्रकारंयंप्रतापंउदीरयंतंगायंतं देहिनंशरीरिणंसंसरणंसंसृतिस्तांप्रददातीतिसंसृतिप्रदःजन्ममरणदात्री
उदीरयंतंयमित्यातिदुर्जयापराभवसेवनसंसृतिप्रदा॥ अजाजितानशेषजनापिदेहिनंविवस्वतःकिंबहुलक्षपा
तिके॥२४॥ आतोनुपसर्गेकइतिकः॥ आतोलोपइटिचइत्याकारलोपःदुर्जःखेनजयोयस्याःसेतिवाअतिशायेनदु
र्जयाजेतुमशक्येत्यर्थः जिताअशेषाःसमग्राजनायथासातथाभूतापि अजामाया अजामेकाम् अजांध्रुवां
स्यपदजपादस्यादिश्रुतिस्मृतिषुजानाद्ब्रह्ममायावाचकत्वंप्रसिद्धंनपराभवसेवपराभवंनकरोसेवसतद्दुरा
गोनस्मादितिभावः॥ अत्रकाकाकार्थांतरंन्यस्यति विवस्वतः सूर्यस्यअंतिकेसमीपेवर्त्तमानंजनमितिशेषः॥ ब
हुलक्षपाह्वदमपक्षरात्रिः किंपराभवतिध्वांतादतंकरोतिकिम्नकरोमेवेत्यर्थः अत्रसामान्यस्यविशेषणस

हरिसं· ॥२६॥ यो

मर्थनस्तस्योर्थान्तरन्यासोलंकारः तस्य च काकुवक्रोक्त्योत्थापितत्वादंगांगीभावेन संकरः केचित्तु पादत्रय | सर्ग·१
गतैकवाक्यस्योत्तरवाक्येन समर्थनात्काव्यलिंगमाहुः अपरे दृष्टांतमपि वस्तुतस्तु प्रतिवस्तूपमैवेत्याहुः ॥ त्र्य
अयमिति । अयं प्रत्यक्षाद्दृश्यः तपसो धर्मात्संभवो जन्म यस्य तस्य यो विक्रमः पराक्रमः स एवारुणः सूर्यः तेनाश्र
श्रितानि स्वाश्रयं वंति यानि नीरजन्मानि कमलानि तेषु उदयं उपेत्य स्वकीयमुदयकालमेत्य श्रियं विकासलक्ष्मीं
भांति सर्पयति हि निश्चितं किं कुर्वन् स्वस्य सुहृत्त्व स्वकीय मित्रादिवर्गेषु अनुग्रहं समृद्धिः स्वकीयसमृद्धिः फल | त

अयं तपः संभवविक्रमारुणः श्रियं दिशन्नाश्रितनीरजन्मसु । उपेत उद्योत्युदयं विभावयन् फलं समृद्धेः स्वसु
हृत्स्वनुग्रहं ॥ २५ ॥ क्षमातले दातरि यत्र दातरि ह्याहितानां सुजनस्य पातरि । जनाः प्रतापोऽस्य तपस्यवस्थिताश्च
नाऽधना शत्रुजिताश्च दुःखिताः ॥ २६ ॥ विभावयन् ज्ञापयन् श्रियं दिशन्नातीति संबंधः । अत्र श्लोके निदर्शनालंका
रः । अपरां बोधनेत्याहुः क्रियया सत्सदर्थयोरिति लक्षणात् ॥ २५ ॥ क्षमेति किं चेति चार्थः यत्र भगवति दात
रि दानशीले सती सर्थः उदारत्वाद्दानेऽस्मान् त्यजन्ति इति नाच्छी सेत्यन्वयः क्षमातले भूमौ तत्रापि कुत्र वित्तस्य वे
ऽपि जनाः शत्रुरिपुः इत्यर्थः अधना निर्धनाः नावस्थिताः यत्र सुतरत्राण्यन्वेतव्यः तपोधर्मस्तस्य ये अहिना ॥२६॥

न्यत्र वस्तेषां दातरि विदारणशीले सतीत्यर्थः पूर्ववत्तत्र । शत्रुभिः सपत्नैः जिताः पराभूताः केऽपि स्वभक्ता इति
शेषः नावस्थिताः सुजनस्य सज्जनस्य पातरि रक्षके सति पारक्षणोऽस्मात् कुत्र चित् दितिकर्त्रे इत्यर्थे एतु लुत्वचावि
तित्वच प्रत्ययः दुःखिताः संजातदुःखाः सज्जनाः नावस्थिताः तदस्य संजातं तारकादिभ्य इतच् इति तच् प्रत्ययः
अत्र यथासंख्यं नामालंकारः यथासंख्यं क्रमेणैव क्रमिकाणां समन्वये इति तल्लक्षणात् इत्थंभूतोऽस्य हरिरु
द्यभगवतः प्रतापो जयति सर्वोत्कर्षेण वर्त्तते इत्यर्थः ॥ २६ ॥ अथ श्री हरेः प्रतापं पुरुषत्वाद्रूपेणानुवर्णयति

दिगीशनापत्नीरन्यादिग्वधूः समं प्रतापनाम्नाध्यगमत्समुद्धती । विवद्ध हस्तस्य रतिः नाग्रामनोऽधिकाः लघन्कांच
रितेतरानयत् ॥ २७ ॥ दिगीशेति अस्य श्री हरेः विविधसभावादेर्विशेषेणाभिन्नः प्रतापएव नाम पुरुषः प्रतापना
प्रतापाख्यः कामुकपुरुष इत्यर्थः सहमुदा प्रसादेन वर्त्तते इति समुदः तेन सहेति तुल्ययोग इति बहुव्रीहिः
साध्वनिर्धैर्ययासौ ताः दिगीशानापत्नीरिन्द्रादिलोकपालयोषितः स्त्रादस्त्रा संख्याकाः दिग्वधूर्दिशानाल्पा अंगनाः
समं युगपदेव रहो विजनस्थले अध्यगमत्स्वाभिलषितस्त्रां सेवोपभुक्तवानित्यर्थः तथापि तस्य प्रतापनुः रतिः सु
रभोगप्रीतिः नो नाम नाम त्रां तिं नैवाभिपेदे तच्छांत्येद इति शेषः अधिकां दशादिग्भ्योऽप्यतिरिक्तां दिशाम् । लघन्

हरिसं॰ कामयन्मन् कामितरां दिनाम् चरितागमिष्यति यद्वा भोदन्त्रादिभ्यः इतराणकादन्त्री दिक् ननेवास्ति अ सर्ग-१
॥३१॥ तः कांगमिष्यंतीति त्रांके इति भावः अत्र रूपकसंदेहसंकरो लोसेक्षा अत्र हि दिग्वध्वः स्वाधीनपतिकाः तल्ल
क्षणं तु सदासाकूलाज्ञाकरप्रियतमा स्वाधीनपतिकेति इयं च मुग्धामध्याप्रौढाभेदेन त्रिविधाः तास्वत्रेमाः प्रौ
ढा एव इयमपि स्वीयापरकीयासामान्याभेदेन त्रिधा तत्रेमाः परकीया एव तल्लक्षणं तु प्रकटान्यपुरुषानुरागा
परकीयेति सचात्र समुसदे नद्योसत्तेसापि परोढाकन्यकाभेदेन द्विधा। तत्रेमाः परोढा एव दिगीन्द्रपत्नीशितिप
दोपन्यासात् साच धीराअधीराधीराधीराभेदात्त्रिधा। तत्रेताः धीराः धृतिपदोपादानात् रसस्तु शृंगारः सच स
मविधसंभोगैकादन्त्राविध विप्रलंभभेदेन द्विविधः। तत्रात्र संभोग एव। स तस्यापि समभेदेषु मध्ये ऽत्र शृंगार एव
रहो ऽध्वगमसदप्रयोगात्। विभावानुभावसात्त्विकव्यभिचारिभिर्नीतो ऽङ्कोऽत्र शृंगार हेतुर्नवविधस्थायिभावे
ष्वत्र रसारब्धः स्थायिभावः रतिपदप्रयोगात्। निर्वेदादित्रयस्त्रिंशज्जेदव्यभिचारिभावेष्वत्र नायिकानायकनि
ष्ठाध्यसौत्सुक्यमसादयो हि संचारिभावाः तत्र मुदोत्सुक्यम्। धृतिः प्रसिद्धैव लक्षणमतिरिति विभावो द्विविधः
आलंबनविभाव उद्दीपनविभावश्च अत्र दिग्वध्व आलंबनविभावः रहः शुद्धोत्क उद्दीपकविभावः। अनुभाव
स्तु रसत्रामनप्रतीतो निर्लज्जत्वांगकंपनादिरेव। अष्टविधसात्त्विकभावेष्वत्र रसत्रामनप्रतीतो रोमांच एव ॥३१॥

रसस्य नायकनायिकोभयारब्धभेदेष्वत्रोभयारब्ध एव। मुदुत्सुकयोरुपादानात् नायकानामपि दक्षिणानुकू
लधृष्टशठभेदेन चातुर्विध्यादत्र समयदोपादानाद्दक्षिण एव तद्द्विविधेऽत्रोपपत्तिरेव। तस्यापि चातुर्विध्येऽत्रोत्त
म एव उक्तेतरो रसवदलंकारोऽपि॥ ३१॥ जनस्येति कमलासनो ब्रह्मा विरिंचः कमलासन इस मरः स आदिर्मु
ख्यो येषां तत्सनकादिमुनिवृंदानां तैः निरूपितः सदा गीतः पुनः पुनः संश्लाघितः इत्यर्थः ब्रह्मभावायत्र मुक्तत्वे
देहेपि सदासेव्य इति भावः यः प्रतापः पत्नदोर्निससंबंधात्स इस ध्याहार्यः। सः द्रुतं श्रवणक्षणएव जनस्य प्राणि
जनस्य मोहं समुद्रस्यति द्रुतं निरूपितो यः कमलासनादिभिः। उपेयिवानेस सकुभुज्ज्या दितः पराभवं किंस वि
धं विभावसोः॥ २८॥ जातस्य मोहं देहादावात्मभावरूपं अनात्मीये कलत्रादौ आत्मीयतारूपविपरीतज्ञानं वा
मोहमविद्यां वा अथ मोहो ऽस्त्रलिंगः स्यादविद्यायां च मूर्छने इति मेदिनी। मोहं मिक्षेतिमूर्छायामविद्यायां च
सूरयद इति विश्वः समुदस्यति हरे क्षिपति विनाशयतीत्यर्थः। समुद्पूर्वादस्यतेः कर्त्तरि लट् विभावसोः सूर्य
स्याग्नेर्वा सूर्यवह्नी विभावसू इस मरः स विधं समीपं समीपे निकटासन्नसन्निकृष्टसनीडवत्। सदेशाभ्याशा
सविधसमर्यादसवेशावदिस मरः उपेयिवान् उपगतः उपेयिवाननाश्वाननूचानश्चेति कस्प्रसयांतो निपातः

हरि सं· अस्कभूस्त्राणी भयं आदित्यैर्येषां त्रीतादीनां ते भय इति ततः पंचम्यास्तस्मिन् पराभवं पराजयं किं एति न प्राप्नोति। सर्ग-१
॥२८॥ सर्थः अत्रप्रतिवस्तूपमानामालंकारः अनुपात्ता विवादीनां वस्तुनः प्रतिवस्तुना यत्र प्रतीयते साम्यं प्रतिव
स्तूपमा तु सेति वाग्भट्टः एतट्टीकायामुदाहरणं यथा बकुवीरेष्वसावेकोयदुवंशेऽद्भुतोऽभवत् किं केतक्यां द॰
लानि स्युः सुरभीण्यपि खिलान्यपीति ॥३७॥ अगाधतेति पयांसि जलानि निधीयंते अत्रेति पयोनिधिः सरस्वान्
रत्नाकर इत्यर्थः सरस्वान् सागरोऽर्णवः रत्नाकरो जलनिधिरित्यमरः कर्मण्यधिकरणे चेति किः पयांसि निधि॰
अगाधता नास्ति पयोनिधौ विद्यंते नहि तत्सैन्यसमरं क्षमाधरे ॥ अलंघ्यता हेतु वक्त्रादि हि भयं फणभृदीन्द्राद्यन
वाप्तपारके ॥३८॥ तिवा तस्मिन् अगाधता अतलस्पर्शता अगाधमतलस्पर्शे त्रिषु च खे नपुंसकमिति मेदिनी
अस्ति विद्यते इदं प्रसक्षगाम्यं औन्नत्यमुच्चभावो नास्ति धरतीति धरः क्षमायाः पृथिव्या धरो धारकः क्षमाधरः
पर्वतः तस्मिन् अयमतिशयेन औन्नत्यमस्ति इतरोन्नसमभिन्ना अगाधता नास्ति हि निश्चितम् फणा बिभर्ति
इति फणाभृत् शेषः क्विप् ईंद्राः शिवः तेऽलआदी येषां देवादीनां तैर्नो वाप्तो न प्राप्तः पारो यस्य तस्मिन् समासांतः कः
यद्वा फणाभृतामीन्द्राः शेषस्तस्य आदित्यैर्येषां शेषं पूर्ववत् शेषेण सहस्रमुखैरनुवर्ण्यमानोऽप्यपारः कुतोऽस्मेयां ॥२८॥

पारभूतमित्यर्थः इह प्रतापे लंघितुमाक्रमितुं योग्यो लंघ्यो न लंघ्योऽलंघ्यस्तस्य भावस्तत्तास एव हेतुः कारणं
तस्य वक्त्रात् वक्त्रावर्जितत्वात् उभयमप्यस्तीति ततोऽत्राधिक्यम् ॥ अत्रोपमानाभ्यामुपेयाधिक्यवर्णनाद्व्यतिरे
कोऽलंकारः व्यतिरेको विशेषश्चेदुपमानोपमेययोरिति लक्षणात् ॥ केनचिद्यत्र धर्मेण द्वयोः संसिद्धिसाम्ययोः
भवत्येकतराधिक्यं व्यतिरेकः स उच्यत इति वाग्भट्टोलक्ष्यत ॥३९॥ प्रतापेति महानतितेजस्वित्वाद्बृहत्श्रिया
लइतियावत् महद्भासे विशाले चेति विश्वः यद्वा महमुत्सवं तेजो वाऽस्तीति प्राणी नित्रीवयतिभगवज्ञक्तजनाना
प्रतापपूषा त्रिदशेंद्रदुस्तरानयं महानंतरवैरिवारिधीन् ॥ विशेषयसेव कुकर्मयादसो महात्मनां किं भवतीह
दुस्तरं ॥४०॥ मितिमहान् अनप्राणनेऽस्मात् क्विप् महउन्सवतेजसोरिति विश्वमेदिनी ॥ अयं प्रसक्षतयानु
भूयमानः प्रताप एव पूषा आदित्यः विवस्वानितियावत् भास्वद्विवस्वत्सप्ताश्वहरिदश्वोष्णरश्मयः विकर्त्तनार्कमा
र्त्तंडमिहिरारुणपूषणइत्यमरः त्रिदशेंद्रदेवानामपीड्या एकववलंवात्तेस्तेनवाक्रुस्तरांस्तरीतुमशक्यान् ॥ अ
पारानंतत्वात् कुकर्माण्येव पादांसि नक्रमकरादिमहासत्वानि येषु तान् ॥ अंतरवैरिणोंऽतः शत्रव एव वारिध
यः समुद्रास्तान् विशेषयसेवयथास्यः पंकानित्यर्थः तदेवार्थांतरन्यासेन समर्थयति महात्मनामित्या।

द्विना महात्मनां महानुभावानां इह लोके दुष्करं अनुचितं किं भवति न किमपी सर्थः अत्र प्रतापपुरुषोरंतः
तुसमुद्देयोः कुकर्मयादसोश्चभेदे पि त्रिदंडोंदुकुत्स्तरादि विशेषणोक्ति पूर्वकमभेदारोपादनुभयाभेदारूपकालं
कारः तस्यार्थांतरन्यासस्य च परस्परं निरपेक्षत्वेप्येकत्रारोपात्स्थितं दुग्धवत्संसृष्टिः तथा च विशेषणस्य दुष्
कीकरोती सर्थ विधानेनरा ग्राह्यप्रतीतेः समासोक्तिरपीति तयोरंगांगित्वेन संकरश्च ॥४०॥ अयमिति अ
यं प्रतापः विजिह्मानि कुटिलानि सत्त्वानि स्वभावाये षां ते जिह्मसत्त्वकुटिलेमंदेइति मेदिनी सत्त्वं गुणे पिशाचा

अयं नयसा भास्करसंपदं क्षयं विजिह्मसत्त्वा भास्कर घूकसेविताः॥ मनोजलोभादि निशाचरोत्तमां विभावरीं वासरत
द्युत्थो दितः॥४१॥ द्वैबलेद्व्यस्वभावयोः आत्मत्वेष्ववसायाकृ विलेषस्त्री तुजंतुष्विति च यद्वा विजिह्मः कु
टिलोध्यवसायश्छलंवायेषामिति तथाभूतायेऽस्फरादि तिस्फतास्त एव घूकानुलूकाः उलूके तु वायसाराति
पेचको दिवांधः कौशिको घूक इत्यमरः तैः विविताम्मनोजः कामश्चलोभोविषयभोगधनादितृष्णा च तौ आदी
येषांमानादीनां त एव निशाचरा राक्षसाः राक्षसः कौणपः क्रव्यात्क्रव्यादोऽस्रप आशरः रात्रिंचरो रात्रिचर
इत्यमरः तेषामोत्तोबलं यस्यां तां आस्कर संपदमस्कर गुणसंपत्तिं वासरं दिनं करोतीति वासरकृत्सूर्यः उदि ॥२९॥

तउदयंगतः सन्यथा विभावरीं रजनीं तथा क्षयं विनाशं नयति प्रापयति॥ अत्र कुटिलाध्यवसा एव घूका
मनोजलोभादय एव निशाचराइति समासवशाद्रूपमेययोरस्फर मनोजलोभाद्यो रुपमानयोर्घूक निशाचर
योश्चाभेदः प्रतीयत इति भवति तथाविधो रूपकालंकारः तथा चोपमेयभूताया आस्करसंपदउपमानभू
ताया विभावर्याश्च घूकसेवित निशाचरोत्तस्त्वरूपसमान धर्मनिबंधेन प्रताप भास्वतोश्च तद्वत्त्वेनोपमाया
रूपकस्य च संकरः॥४२॥ तनूभृत इति यः प्रतापः विषयोगोचरो यासां ताः यद्वा यस्मिन्प्रतापे विषयोरू

तनूभृतोयद्विषया गिरो भृशं विभूषयंसेव विनापि मंडनैः॥ यदीयसंपर्क विवर्जिताह्यियानचित्रभूषाइव
नागविग्रहान्॥४३॥ पादिकायासांताः यद्वा यः प्रतापो विषयो देशो यासां ताः यद्वा यः प्रतापो विषयो
ज्ञातोऽर्थोयासां तथोक्ताः विषयो गोचरे देशे तथा जनपदेऽपि च॥ प्रबंधाद्यस्य योज्ञातस्तत्ररूपादिकेषु
मानितिमेदिनी॥ यद्वा यः विषय इंद्रियार्थोयासां ताः विषयः स्यादिंद्रियार्थेइति विश्वः गिरो वाचः गीर्वाग्
वाणी सरस्वती समरः मंडनैर्विभूषणैः भूषणं स्यादलंक्रिया अलंकारस्त्वाभरणं परिष्कारो विभूषण
मित्यमरः विनापि अलंकारैर्विनापीसर्थः तनूभृतः शरीरिणः देहवतो जीवा नि सर्थः भृशं अ[illegible] क्षुण्ण

संतमित्यर्थः यद्वा भृशं यथा तथेति क्रियाविशेषणं ॥ मंक्षु शीघ्रं भृशार्थे इति मेदिनी विभूषयं सेवसंक्षोभयं से
वेत्यर्थः यस्य प्रतापस्यायं पदीयः संपर्कः संबंधस्तेन विवर्जिताः ग्राम्यगीतविषया इति भावः यावाचः विचि
त्रा नाना विधा या भूषा आभरणानि नानालंकारा इत्यर्थः तां अवधिं ग्रहान्नृणां नारीणां च ॥ न भूषयंति क्षोभं
न जनयंति हि निश्चितमेव अत्र पूर्वार्द्धे मंडनरूपकारणाभावेऽपि संक्षोभनतारूपकार्यस्य वर्णनाद्विभा
वनालंकारः विभावना विनापि स्यात्कारणं कार्यजन्म चेदित्युक्तेः ॥ उत्तरार्द्धे च चित्रभूषाकारणे सत्यपि क्षो

समाधिसिद्धिं मनुजाः सुदुर्लभां व्रजंति मेदिन्यामपि साधनं क्षितौ ॥ कृतेप्यतः सततरचित्तविक्षतां स्थितिं च त
विध्यात्यमरेश्वरालिखितां ॥ ५२ ॥ भाजननरूपकार्यावर्णनाद्विशेषोक्तिरलंकारः कार्याजनिर्विशेषोक्तिः स
तिपुष्कलकारणे इति लक्षणात् उपमा च तयोः संसृष्टिः ॥ ५३ ॥ अथानेनानमसाधारणत्वमस्याह समाधी त
ति अतः प्रतापात् मंदा अतीक्ष्णा मूर्खाः स्वैराः अभाग्यारोगिणश्चापि मंदोऽतीक्ष्णे च मूर्खे च स्वैरे चाभाग्यरो
गिणोरिति मेदिनी मनुजाः मनुष्याः मनुष्या मानुषा मर्त्या मनुजा इत्यमरः क्षितौ पृथिव्यां न स्वर्गादौ लोके त
त्रापि साधनमृतेपि साधनं विनापि सुतरां दुर्लभां साधनाभावे संततं दुर्लभामित्यर्थः समाधेर्भगवन्मूर्तौ चि

त्तप्रणिधानस्य सिद्धिं साध्यावस्थां सतीं यथार्थां परेषां स्वतोऽन्येषां विलक्षणांतःकरणस्यापि विशेषेण क्षता
ज्ञातृत्वं तां विधिर्ब्रह्मा आदिर्येषां ते च ते अमरेश्वराः इंद्रादयस्तैर्लिखितां प्राप्तुमिष्टां दुर्लभप्राप्यावस्थां कृतोः
कर्मणि इति सन्निहितेसनिमीमासादिना इस् अत्र लोपोऽभ्यासस्येत्यभ्यासलोपे समत इति त्वे लरिवेति चर्थे च
कप्रत्यय इडागमश्च स्थितिं सिद्ध इत्यमरः सीमा च स्थितिः स्त्रियामवस्थाने मर्यादायां च सीमनीति मेदिनी व्रजंति
प्राप्नुवंति अमे तु यमादिमहासाधनैरपि यां नाप्नुवंति तामुक्तप्रकारां त्रिविधां त्वत्समसाधनसंपत्तिं विनापि य

स्फुरत्सुतापोद्यमकरे समुन्नते यन्नृपे विधुस्तस्य दयापयोनिधेः ॥ निरंतरं सर्वकलाभिरेधते गतक्रमं तापतमोवि
वर्जनः ॥ ५४ ॥
स्युवणादिनेवाधिगच्छंतीति किंवर्ण्यते तोऽस्य प्रतापस्य पराकाष्ठेति कविः सन्निरेव धूनन पुलकि
तरोमा व्याप्य गद्गदाक्षरः सप्रेमाश्रुः पठनात् सेति भावः अलंकारस्त्वत्र विभावनैव विभावना विनापि स्यात्क
रणं कार्यजन्म चेदिति काव्यविलासविरचितां विभक्ता वार्याः ॥ ५२ ॥ स्फुरदिति दयायाः पयोनिधिः समुद्रो दयाप
योनिधिस्तस्य तस्य हरेः स्फुरन् विजृंभमाणो यः प्रतापः स एवोद्यमकरः सूर्यस्तस्मिन् समुन्नते उन्नतिं गच्छति उदितवती
सत्यर्थः तापो धर्मश्च तमो ध्वांतं च तयोर्विवर्जनो भेत्ता विना यातक इति यावत् पदार्थकीर्तिरेव विधुश्चंद्रः निरंतरं सर्व

दागतक्रमंगतपूर्वापरभावंयथातथाक्रमंहित्वेसर्थः द्विवापीतिन्नोषःसर्वकलाभिःपूर्णकलाभिःलधतेव
र्द्धतेसहोक्तिरलंकारःसहोक्तिःसहभावश्चेज्जासतेजनरंजनइतिकाव्यविलासेचिरंतनाविभट्टाचार्यः॥४४॥
यदितिसतांसाधूनांमंतराएयंतःकरणान्मेवांभोजवनानिताान्मवबोधयतिविकासयतीतितथोक्तःयस्मभ
गवतःउद्यसन्देदीप्यमानोयोविक्रमःपराक्रमःसएववासरेश्वरोऽहर्पतिःसूर्यइतियावत्मरुतोदेवानांवि
पक्षाःसपत्नाःमरुतोपवनामराविसमरःरिपौवैरीसपत्नारिद्विषणदुर्हदःद्विड्विपक्षाहितामित्रदस्युरात्र

यद्रुत्तसद्विक्रमवासरेश्वरःसदंतरांभोजवनाववोधनः॥मरुद्विपक्षक्षितिभारउत्ततुर्गुरुव्रजानांभःपरिशोषय
सलं॥४५॥अदःप्रतापोद्यमकरस्यनिर्मितोद्दिवाकरःकिंपरमाणुसंचयैः॥नभस्युदारोज्वलकांतिमंडलोविरिं
चिनावाडवबह्निरंबुधौ॥४६॥
सत्रात्रवइसमरःक्षितौपृथिव्यांयोभारस्तंकुर्वंतीतितथाभूतानिजनूंषिजन्मा
नियेषांतेचतेतेचयेगुरुवस्तेषांव्रजःसमूहस्तदेवांभोजलंतत्अलमसंतंपरिशोषयतिशुष्कीकरोतिश्लेषरू
पकसंकीर्णोऽर्थोपमानामालंकारःलक्षणंकाव्यविलासाज्ज्ञातव्यं॥४५॥अदइति नभसिआकाशेस्थित
इतिशेषःदिवाकरःसूर्यःअमुष्यप्रतापोऽदःप्रतापःसएवोद्यमकरोऽर्कस्तस्यपरमाणूनांसंचयैःसमूहैः



निर्मितनुसादितःकिंअथवाविरिंचिनाब्रह्मणाअंबुधौसमुद्रेउदारंमहत्उज्वलंदेदीप्यमानंकांतिमंडलंप्र
भावकवालंयस्यउदारोदाच्मह्तोरित्यमरःवाडवश्चासौवह्निश्चवाडववह्निर्वडवानलोनिर्मितःकिमिति
शंकेइत्यध्याहार्यं॥अत्रतित्रयोक्तुस्रेक्षासंदेहानांसंकरोऽत्रालंकारःअदइति अमुष्यप्रतापोऽदःप्रतापःशि
पवःत्रात्रवस्तएववारणाहस्तिनस्तेषांव्रजःसमूहस्तस्मिन्त्रात्रुगजव्रजेद्विसर्थःगजारिःपंचाननःसिंहइति
यावत्आत्मीयाःस्वभक्तास्तेषांयोभवाब्धिःसंसारसमुद्रस्तत्रकुंभजोऽगस्तिःअगस्त्यःकुंभसंभवइत्यमरःअ

अदःप्रतापोरिपुवारणव्रजेगजारिरात्मीयभवाब्धिकुंभजः॥श्रितांतरांभोजनुषांदिवाकरोद्विजिह्वाहूषित
त्रागिनांकुरी॥४७॥प्रतापिनसंवदतोवनःपुरोनकोऽपिनूनंसहतेऽस्यजल्पितुं॥गलसन्नोषंगलनालकेयदि
स्वगोकुलंवह्निकदाचनोद्धतः॥४८॥
त्मीयजनसंसारहरइत्यर्थःश्रिताभक्तास्तेषामंतराण्यंतःकरणान्येवांभो
जनूंषिकमलानितेषांदिवाकरःसूर्यःतद्विकाशकमार्त्तंडसन्निभइत्यर्थःद्विजिह्वेपरोक्षप्रत्यक्षभेदेनान्यत्तस
त्कथनादिकार्यंभिन्नेयेषांतेषांभावस्तत्तातयादूषितानाजातदोषायेतएवत्रागिनोवृक्षास्तेषांतुकरीहस्तीभं
जकइत्यर्थःउद्रेखोलंकारः॥४७॥प्रतापिनइतिप्रतापोऽस्यास्तीतिप्रतापीतस्यअतएवनाविनिःसंवदतीति

संवदंतस्य सम्यक्त्वामुख्यवार्त्ताः कुर्वत इत्यर्थः अस्य यस्य प्रतापो ऽनुवर्णयेते तस्यास्य पुरः निकटे अंतरे ऽति त्रोप
को ऽपि कश्चिदपि यदिति यत्रा को ऽपि त्रपाऽपि को त्रपात्मेति विश्वः वचो वचनं जल्पितुं भाषितुं न सहते न तु तं स
मर्थो न भवतीत्यर्थः यदितिकृतः काऽपि कदाचन वक्तिनर्हि स एव अन्यो यं समयं स्वगोकुलं निजवाक्यमूर्द्धं गल
कः गलः सर्जरसे कंठ इति विश्वः तस्य नालः कांडं ततः स्वार्थिकः कन् तस्मिन् नालं कांडे मृणाले चेति हैमः ॥
कांडो नाले तरुस्कंध इति विश्वः स्खगलति गलयति अंतर्लीनं कारयतीत्यर्थः गल अदने ऽस्मादंतर्भावितण्यर्थाज्ञ्वो

अदः प्रतापाग्निरसक्तत्वांतरे पतन् दिनो दीपयते निरंतरं ॥ जहाति तत्स्नेहपरिस्रवार्द्रितप्रकामकोमलत्वयुतांगमद्भुतं
४९ ॥
वादिकाद्भुत अत्र वल्कुरुसाहसादि भावत्वांसुक्तेः समाहितालंकारः लक्षणं तु समाहितं तज्ज्ञा यस्य त्वांतेर्य त्र परांग
तेति गर्वोक्त्यौत्मानदभावानां त्वांतेः त्वांतरस्यांगमिति लक्षणानुगमः विषादनं चालंकारः इष्यमाणविरुद्धार्थसं
प्राप्तिस्तु विषादनमिति लक्षणात् मामं जल्पितुं तु जगति कश्चनापि न समर्थः कथमसावुक्तो वक्तुं मुद्ध्यु को ऽतोयं त्वां
नः स्याद्वेत्समीचीनमिति स्वयं चिंतितेस्व तत एव मौ विरत इत्यर्थे प्रहर्षणालंकारो ऽपि सर्वेषामेकत्र निबंधनात्संसृष्टिः स
माहितप्रहर्षणयोरुत्याप्योत्थापकत्वेनांगांगीभावसंकरश्चेति विस्तारविधानाद्विरम्यते ॥ ४९ ॥ अद इति अमुष्य ॥ ५३ ॥

प्रतापाग्निरेतत्प्रतापानलः असंतो ऽरय एव तत्त्वानि तेषामंतरं मध्यं तस्मिन् पतन् सन् निरंतरं दिनः दीपयते भास
यति परं तु स्नेहः प्रीतिस्तैलं चेति श्लिष्टरूपकं स्नेहस्तैलादिकरसे इष्ये स्यात्सौहृदे ऽपि चेति विश्वः तस्य परिस्रवणं परि
स्रवस्तेन आर्द्रितं संजाताार्द्रभावं प्रकामम संतं यत्कोमलत्वं कोमलभावस्तेन युतं युक्तं स्नेहपरिस्रवार्द्रितं प्रकामकोम
लयुतमंगं त्वरारीरं यस्यास्तं तथोक्तं भक्तजनं जहाति परित्यजति यत्तदद्भुतमाश्चर्यं यतदोर्नित्यसंबंधाद्य च्छब्दाध्याहा
रः तत्त्वमध्ये पतने ऽपि प्रतापानलस्य पद्धीहस्यभासनकर्तृत्वं च वर्णितं तेनायं विरोधालंकारः विरोधो ऽनुपपत्तिश्चे

यदीय संबंधरकुपस्थिताक्षयाकराद्येयुवुधामुधासुधा ॥ सुकुर्विपत्तपंसपितां भ्रमद्धियो न मृग्यते मोहवत्वां ज्ञानैर्वरं
५० ॥
गुणद्रव्यक्रियायेवु इति काव्यविलासे न तल्लक्षणत्वात् तत्रोदाहरणं च सकीहत्वाः त्वां नकरोयो मां दहति संततं स
चकालः कथं क्रूरो यो मे त्वारणतां गत इति अथ च जलपतनमग्रे दीपनक्रियायाः प्रतिबंधकं तथाप्यग्रेः प्रवलत्वो
क्तेस्तत्तीयो विभावनाभेदो ऽपि अग्नेः प्रदीप्तत्वे ऽपि स्नेहार्द्रकोमलांगयुतसाग विधानवर्णनाद्वितीयो क्तिश्च द्वितीयो
क्तिरनुत्पत्तिः कार्यस्य सतिकारणे इत्यपि काव्यविलासे एवमत्र रूपकविरोधविभावनाविनोक्तीनां परस्परसा
कांक्षत्वानाकांक्षत्वाभ्यां संसृष्टिसंकरावपीति विरताः स्मो विन्तोषालापादिति ॥ ४९ ॥ यदीयेति यस्य भगवतस्तोपर

हरिसं· स्यायंयदीयः सचासौसंबंधश्चसविद्यतेऽस्यामितियदीयसंबंधवतीतदस्यास्त्वमिन्नितिमतु विनिमन्नुपमाउ सर्ग·१

॥२२॥ पधायाश्चेतिमतुपोमस्यवः सा चासावुक्तिश्चतत्रतां वाउपस्थिताधिगताउन्कोस्थिताइसर्थः कथापरमोर्थ्यपी
यूषं भवतीतिन्नोष्वः अमंसोधियोमृतयोयेषांतेभ्रांतचेतमइसर्थः वुधाः पंडिताः अपितांकथांमुहुः पुनःपुनः
क्षपाकरश्चंद्रः आद्यौयेषांस्वर्गादीनांतेषुमुधामिथ्येवविपन्नूपतिनत्वुकथंवुधानामप्येवमितस्त्रार्थांतरंन्यस्य
तिनेतिमोहवन्नात्मोद्यधीनत्वात् जनैरैतैर्वरंश्रेष्टमृस्थानमनमृगपतेनान्विष्यते सापकृवरूसकातिन्नायोक्तिर

यदीयसंसर्गमुपेत्यगौरवंद्रुतंलधीयानपियातिमानवः ॥ तथाहिमूर्द्धस्यवधार्यतेगुणः प्रसूनमालाव्यतिषंगतांग
तः ॥५१॥
अर्थांतरन्यासश्चालंकाराः अनुप्रासश्च तथावाभिव्यक्तः अव्योविधोवधुमुखेफणिनांनिवासेकेविद
दंसमृतमस्तिदिवीतिचाम्ये। क्षारःक्षयःपतिमृतिर्गरलंविनाह्नः कंवेकथासमतिवेभगवज्जनानामिति ॥५०॥
यदीयेति। यस्यहरिश्चितापस्यायंयदीयः सचासौसंसर्गश्चतं उपेत्याधिगम्य लघीयानपिअत्यल्पोपिमानवः। दु
तंशीघ्रंगौरवंमहत्वेपामधिगच्छति तथाहिप्रसूनानिपुष्पाणितेषांमालास्त्रक्तस्याव्यतिषंगः संगस्तस्मा
भावः स्तस्मात्तांगतोऽधिगतः कुसुममयपंक्तिसंबंधंप्राप्तइसर्थः गुणः सूत्रंमूर्द्धनिशिरसि अवधार्यतेधारणीक्रि ॥२२॥

यते जनैरितिशेषः गुणः प्रधानेरूपादौमौर्व्यांसूत्रेवृकोदरे स्तंभेसत्वादिसंध्यादिविद्यादिहरितादिष्विति के
शवः सामान्यस्यविशेषेणसमर्थनरूपोऽर्थांतरन्यासः ॥५२॥ विभातीति स्वधामनिस्वस्थाने धामरश्मौगृहे
देहेस्थानेजन्मप्रभावयोरित्यनेकार्थसंग्रहे हैमः यत्राब्रह्मणएवक्षरेसमग्राणियाम्यावरणानिश्चथिलप्रेतो चा
ख्याकाशाहंमहस्यप्रधानाख्यानितैर्युक्तोयुक्तः योऽसंचयोब्रह्माउसमूहः अपुवद्विभाति। तत्रधाम्निदेवानां
मंडलानितैः त्रिकालगीतः कलहंसवत्पांडुरः श्वेतः कलहंसपांडुरः श्वेतविभ्राद्यूपेणपांडुराद्ब्रसमरः सप्रतापो

विभातियत्राप्येवदंडसंचयोयुतःसमग्राचरणैर्नतत्रस ॥ स्वधामनित्रंसलाणिदेवमंडलैस्त्रिकालगीतःकलहं
सपांडुरः ॥५३॥ प्रतापपूषणोऽस्यकमंडलेनकिंविनिर्मोचितस्तोयनिधिर्महासुनः। त्वं केसपल्लालिमनोरमाज
नैर्हिमार्गयेवाश्रुजलैःप्रपूरितः ॥५४॥
नविभातिकिंवर्ण्यतेऽत्यातिमहत्वमित्यर्थः अत्राधिकालंकारः अ
धिकंपृथुलाधारादाधेयाधिक्यवर्णनमितिलक्षणात् नपमाचेतिद्वयोः संसृष्टिः ॥५३॥ प्रतापेति अस्यपरम
प्रतापवर्णनंसंपाद्यतेतस्यास्यभगवतः प्रतापएवपूषादित्यस्तस्यकमंडलेननेतेजःपुंजेनमहानुतोयनिधिः
विनिर्मोचितः किंमयातुप्रतापतेजःपाटवंसमीक्ष्येवमेवानुमितमित्यर्थः ननुतर्हिकथंसमजलोदकपतेनत्रा

हृत्तांक इति पुनरयं सपल्लालीनां त्रातु श्रेणीनां येमनोरमात्तना: स्त्रीहल्लालीकास्तैः त्रिमार्गया गंगयेव अश्रुज
लैः प्रपूरितः इति शांके। कथममथाक्षारं जलं स्यादिति भावः। अत्रातिशयोक्तिसंभावनोपमारूपकानां सा
कांक्षत्वानाकांक्षत्वाभ्यां अलंकारः संकरोऽमोघोद्यः॥ ५३॥ इदानीं प्रतापवर्णनं तत्त्रुवणफलोपलब्धिक
थनं पूर्वं निगमयति। भुवीति यः प्रतापः भुवि कर्मक्षेत्रे भारते वर्षे बहुतरमुदात्त अतिशयेन बहूर्वदीवेति वि
कृत राक्षिचवनविभंजसमादिना अतिशयार्थे तरप्। साचासौ मुत्तृतया अंसलपीसे सर्थैः श्रद्धावतां तातश्च इं

भुवि हरिशिखाभ्रत्रातं यो दुतं दुरितव्रजं नयति निविडा ज्ञानध्वांतं निवर्हणमाश्रुतः। बहुतरमुदागीतः श्रद्धाव
तातरसंस्थितं जयति स सदा खे मुक्तोपाधिभिर्मुनिभिर्नुतः॥ ५४॥ नपुंसा। बक्रभावे इति शेषः गीतः स्वयमेव
गानविषयः कृतः यश्च बहुरिससाश्रुतः आदरेण श्रवणविषयकृतः यश्च सदा मुक्तस्य कत्रुपाधिर्यैस्तैः
मुनिभिः प्रतन्निनिहृत्तिधर्मस्थितैः ऋषिभिः नुतः स्तुतः सन् उत्सुकतां विसस्पनिष्ठास्वं अंतरमंतः करणं त
त्रसंतिष्ठते इति तथाभूतं। निविडमतिघनं यदज्ञानरूपं ध्वांतमंधकारं दुरितव्रजं पापसमूहं च यो अध्याहार्यः
खे आकाशे स्थितमिति शेषः। अभ्रत्रातमभ्रसमूहं हरिर्वायुरिव निवर्हणं नाशं प्रमाणं गमितिपावत् 

प्रापणं निर्वहणमिसमरः नयति प्रापयति हरिश्चंद्रार्कवाताश्वशुकभेकयमादिष्विति मेदिनी यद्वा हरिर्वा
युः खे स्थितं अभ्रत्रातमिवेसन्वयः एवंभूतः सः पूर्वोक्तो भगवत्प्रतापो जयति सर्वोत्कर्षेण वर्तते हरिणी छ
न्दं रसयुगहयैन्सौम्रौस्लौगो यदा हरिणी तदेति लक्षणात् सर्गांतत्वाच्छन्दोभेदः यथाह दंडी सर्गैरनतिविस्ती
र्णैः श्राव्यवृत्तैः सुसंधिभिः सर्वत्र भिन्नसर्गांतैरुपेतं लोकरंजनमिति चमत्कारभाक्तेन मंगलाचरणपरत्वे
न च सर्गांतश्लोके पुनः हरिशब्दप्रयोगः यथाह भगवान् भाष्यकारः मंगलादीनि मंगलमध्यानि मंगलांतानि ॥

इतिश्री हरिसंभवाख्ये महाकाव्ये हर्षांकेके कविश्रीमदर्चिसानंदवर्णिकृते श्रीहरिप्रतापवर्णननामा प्रथमः स
र्गः॥ १ ॥ श्वनाश्ललिप्रथंतेवीरपुरुषाणायुष्मसुरुषाणि च भवंति स्नधनारश्च प्रवक्तारो भवंतीति
पूर्णोपमालंकारश्च॥ ५४॥ ॥ अथकविः काव्यवर्णनीयाख्यानपूर्वकं सर्गसमाप्तिं वदति इतिश्रीत्यादिः प
रिसमाप्तौ। अर्चिसानंदवर्णिकृत इति कविनामकथनं प्रथमः सर्गः समाप्त इति शेषः। एवमुत्तरत्रापि इष्ट
व्यम् सर्गः स्कन्धिश्रयाध्यायमहोत्सा हात्मसु इति मेदिनी। हरिसंभव इति काव्यवर्णनीयकथनमहाका
व्य इति काव्यलक्षणसंपत्तिः सूचिता श्रीमदिति विशेषणेन कवेर्भगवज्जनानंदत्तनितांतः श्रुत्यार्थसे

एवसंपतिरप्युक्ता इतिश्रीपदवाक्यप्रमाणपारावारीणधुरीणविश्वनाथभट्टात्मजदीनानाथभट्टशिष्यत्र
सक्षवासफदेवश्रीसहजानंदस्वामिचरणकमलोपासकगोपालानंदमुमंतःप्रेरितमतिमाधवदाससत्सहा
यमासावटंकदयाशंकरात्मजश्रीहरिकृष्णैकभक्तभोलानाथभट्टकृतौहरिसंभवकाव्यस्याविष्कृतनाढ्यगदि
नामस्वव्याख्यायांप्रथमः सर्गः ॥१॥ लि०रावलजेगमोरारजीस० १९५६नामाघमासेमेंथाणग्रामेसमाप्तः